दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लैकादशी
भाद्रपद 07 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-11 ■ वर्ष-5 ■ अङ्क-304 | 1 | अगस्त 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

1 जलशक्ति-विभागे नियुक्ताः भविष्यन्ति ४,००० 'बहुकार्य-कर्मचारिणः', सदने मुख्यमन्त्रिणः उद्घोषणम्

4 सिरमौरः- शिक्षाधिकारिभिः सह अमिलत् संस्कृत- शिक्षक- परिषदः प्रतिनिधिमण्डलम्

9 डॉ विमलेश झा, गंगौली, सरिसवपाही, मधुबनी, बिहार
गृहे गृहे त्रिवर्णध्वज- कार्यक्रमस्य समीक्षा(पर्वविशेषः)

## अद्यतनीयं सुभाषितम्

**आलस्यं हरति प्रज्ञां, धनमायुर्यशो बलम्।**
**यस्मिन्नास्ते तदालस्यं, सर्वदोषाकरस्तु सः॥**

भावार्थः- आलस्य व्यक्ति की बुद्धि, धन, आयु, प्रसिद्धि और शक्ति को नष्ट कर देता है। वहीं दूसरी ओर जो व्यक्ति आलसी नहीं होता, वह इन सभी कमियों से मुक्त रहता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## केन्द्रीय-गृह-मन्त्री अमितशाहः सिलिगुडी-नगरे वरिष्ठैः गोरखा-नेतृभिः सह मेलनम् अकरोत्




पश्चिमबङ्गस्य पर्वतीयक्षेत्राणां सर्वैः पक्षधारकैः सह केन्द्रीय मन्त्रिणा अमितशाहेन सिलिगुडी-नगरे उपवेशनमेकं कृतम्। अस्मिन् विषये निर्णयोऽयं जातः यत् तत्रत्य पर्वतीयक्षेत्राणां समाह्वानानां स्थायि-समाधानार्थ पूर्व आईपीएस अधिकारिणः पंकजसिंहस्य नेतृत्वे एकस्याः मध्यस्थ-समित्याः संरचना जाता। समितिरियं केन्द्रीय कार्यालयं प्रति प्रतिवेदनं प्रेषयिष्यति । सिलिगुडी नगरस्य सुकार क्षेत्रे अनुष्ठिते अस्मिन् उपवेशने पश्चिमबङ्गस्य विपक्षिनेतारः सुवेन्दु अधिकारी अन्ये च गणमान्य जनाः उपस्थिताः आसन्।

## भारतेन 'लाइसेंस राज' इत्यस्य कालावधौ उत्पादन-दण्डित-करणस्य स्वीय-दृष्टिकोणे आधारभूत-परिवर्तनं विहितमस्ति - प्रधानमन्त्री




प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारतदेशेन 'लाइसेंस राज' इत्यस्य कालावधौ उत्पादन दण्डित करणस्य स्वीय-दृष्टिकोणे आधारभूत-परिवर्तनं विहितमस्ति। साम्प्रतं तत्स्थाने प्राशासनिक-प्रोडक्शन-लिंक्ड-इंसेंटिव-पीएलआई इत्यनया योजनया माध्यमेन पुरस्कृतः क्रियते। प्रवर्तमान्-वर्षीय 'इकोनोमिक टाइम्स-वर्ल्ड-लीडर्स फोरम' इत्स्मात् मञ्चात् स्वीये संबोधने प्रधानमन्त्री प्रोक्तवान् यत् पुरातनी पद्धतिः साम्प्रतिकी पद्धतितः भिन्न वर्तते। प्रधानमन्त्रिणा पीएलआई योजनायाः सफलता अपि चर्चिता। यत्र सार्द्ध द्विलक्ष-कोटि-रूप्याकाणां निवेशः जातः द्विविंशति-लक्ष-कोटि-रूप्यकाणाम् उत्पादनं-क्रयणं, पञ्चदशलक्ष-कोटि-रुप्यकाणां निर्यातः अपि जातः, चतुर्दश-लक्षाधिकानि वृत्यवसराणि अपि सृजितानि । श्रीमोदी भारतदेशः अन्ताराष्ट्रिय समुदायस्य आशा-विकासस्य च उज्ज्वल स्थानं विद्यते इति प्रतिपादितवान् ।

## सर्वकारेण औषधीनां निश्चित-मात्रा-संयोजनानि निर्माणे, विक्रयणे, वितरणे च प्रतिबन्धं स्थापितम्

सर्वकारेण क्लोरफेनिरामाईन् मैलिएट् तथा फिनाईले फ्राईन् हैड्रोक्लोराईड् इत्येतयोः घटनानां युक्तानां सर्वासां नियतमात्रा-संयोजन-औषधीनां निर्माणे, विक्रये, वितरणे च प्रतिबन्धिताः । स्वास्थ्यमन्त्रालयेन एका अधिसूचना प्रदर्शिता, यस्यां चतुर्वर्षेभ्यः येषु बालकेषु एतासाम् औषधीनां प्रयोगः न करणीयः इति स्पष्टं कृतम्। बालकानां स्वास्थ्य सुरक्षायाः विषयेः एषः महत्वपूर्णः निर्णयः विद्यते। प्रशासनेन इदम् अपि कथितं यत् एतादृशानां संयोजनानां प्रयोगः बालकेषु हानिकारकः भवितुम् अर्हति।

## आन्ध्रप्रदेशस्य विशाखापत्तनम नगरे ब्रिक्स-युवा-मन्त्रिणां उपवेशनम् अभवत्




युवा-कार्य-क्रीडा-मन्त्रालयस्य केन्द्रीय मन्त्री डॉ. मनसुख मांडविया ब्रिक्स देशानां मन्त्रिभिः, वरिष्ठ-प्रतिनिधिभिः च साकं आन्ध्रप्रदेश-स्यस्य विशाखापट्टनम-नगरस्य समीपे स्थितस्य ऐतिहासिकस्य थोटलाकोंडा-क्षेत्रे-प्राचीन बौद्ध-अवशेषानां, स्तूपानां ध्यानकेन्द्राणां, पाकशालानां च दर्शनं कृतवान्। डॉ. मांडविया 'एक पेड़ मां के नाम' इति अभियानस्य अन्तर्गतं थोटलाकोंडा-क्षेत्रे एकं वृक्षारोपणं कृतवान्। इयं यात्रा प्रवर्तमान वर्षस्य ब्रिक्स-अध्यक्षता-इत्यस्य कार्यक्रमाणां भागो विद्यते। विशाखाट्टनम-नगरे ब्रिक्स-युवा-मन्त्रिणां सम्मेलनमभवत्। डॉ. मनसुख मांडविया इत्यनेन साकं शिक्षा-कौशल विकासः, उद्यमिता-कल्याण-संपोषण-विकासः इत्येतेषु विषयेषु सहयोग-सुदृढीकरणस्य उपायानां विषये चर्चा अभवत्। सम्मेलनस्य एते एव प्रमुखाः विषयाः विद्यन्ते।

## भारतीय जनता पार्टीति दलेन वन्दे मातरम् इत्यस्य ऐतिहासिक-गीतस्य संरक्षणविषये एकः प्रस्तावः पारितः




भारतीय जनता पार्टीति दलेन वन्दे मातरम् इत्यस्य ऐतिहासिक-गीतस्य संरक्षणविषये एकः प्रस्तावः पारितः। एकस्मिन् सामाजिक-अनतर्जालीय सन्देशे भाजपा दलीय अध्यक्षः नितिन-नबीनः प्रोक्तवान् यत् दलं केवलं प्रथम-श्लोकद्वयं गायन इत्यस्य कांग्रेस कार्य समित्याः निर्णयस्य विरोधः करोति। तेन प्रोक्तं यत् भारतीय जनता पार्टीति दलं सामुदायिक-संकीर्णतां निराकृत्य राष्ट्रगानं प्रवर्तयितुं सर्वविधाः प्रयासाः विधास्यति। भारतीय जनता पार्टीति दलं 'वन्दे मातरम्' इत्यस्य गीतस्य प्रचार-प्रसारस्य कृते राष्ट्रव्यापि-अभियानम् आचरयिष्यति। नवदिल्ल्यां वार्ताहरैः सह सम्मेलने दलीय प्रवक्ता संबित पात्रा भणितवान् यत् निर्णयोऽयं नव-नियुक्तानां राष्ट्रिय-पदाधिकारिणां प्रथम अधिवेशने गृहीतः वर्तते।

## विदेशमन्त्री डॉ. एस. जयशंकरः रूस-देशस्य द्विदिवसीय अधिकारिक-यात्रा करिष्यति



विदेशमन्त्री डॉ. एस. जयशंकरः रूस-देशस्य द्विदिवसीय अधिकारिक-यात्रा करिष्यति। तत्र श्री जयशंकरः भारत-रूस-अन्तर्प्राशासनिक-आयोगस्य व्यापारिक-आर्थिक-प्रविधि-सांस्कृतिक-सहयोग-विषयाणां सप्तविंशतितमस्य अधिवेशनस्य सह-अध्यक्षतां विधास्यति। भ्रमणकाले डॉ. जयशंकरः रूस-देशस्य विदेशमन्त्रिणा सर्गेई लावरोव इत्यनेन सह मेलन विधास्यति। क्षेत्रीय-वैश्विक विषयेषु चर्चा अपि करिष्यति।

## भारतः सोमालिया-देशेन सह द्वाविंशतिः भारतीय-नाविकैः सह विदेशीय-ध्वजयुक्तयोः वाणिज्यिक-नौकायानयोः अपहरणस्य विषये चर्चां करोति



द्वाविंशतिः भारतीय-नाविकैः सह वैदेशीय-ध्वजयुक्तयोः वाणिज्यिक-नौकायानयोः अपहरणस्य विषये भारतं सोमालिया-देशस्य अधिकारिणां समक्षम् अवोचत्। एम्. टी. सिबू-नौकायां षोडश भारतीय-नाविकैः, एम्. वी. लुतुफ़ु-नौकायां षट् भारतीय-नाविकैः च सह एतयोः नौकायानयोः येमेन-सोमालिया-देशयोः पृथक् पृथक् घटनायां सशस्त्र-समुद्रीय-जलदस्युभिः अपहृताः। केन्या-देशे भारतीय-उच्च-आयोगः सामाजिकान्तर्जालीये पटले अवदत् यत्, सर्वे भारतीयाः नाविकाः सुरक्षिताः सन्ति इति कथ्यते। सः अवदत् यत्, भारतं स्वस्य सामुद्रिक-समुदायस्य सुरक्षायै कल्याणाय च सर्वाधिकं महत्त्वं प्रददाति । मिशन इत्यनेन उक्तं यत् ते सोमालिया-देशस्य सम्बद्धैः अधिकारिभिः सह प्रकरणं विनिमयी कृतवन्तः।

## जलशक्ति-विभागे नियुक्ताः भविष्यन्ति ४,००० 'बहुकार्य-कर्मचारिणः', सदने मुख्यमन्त्रिणः उद्घोषणम्

हिमसंस्कृतवार्ता — शिमला।
जलशक्ति-विभागस्य अन्तर्गतं प्रदेशे चत्वारि सहस्राणि बहुकार्य-कर्मचारिणां पदानि पूरयिष्यन्ते। विधानसभायाः प्रचलतः प्रावृट्-सत्रस्य द्वितीये दिने प्रश्नोत्तर-काले मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयेन एषा घोषणा कृता।
तेन प्रोक्तं यत् जलशक्ति-विभागे सम्प्रति बहुकार्य-कर्मचारिभिः सह अंशकालिक-पदानि (Part Time) पूर्यमाणानि सन्ति, तथा च अग्रिम-समये ४,००० बहुकार्य-कर्मचारिणः अपि नियोजिताः भविष्यन्ति। सः अवदत् यत् कार्यात्मक-पदानि सर्वकारेण समये-समये पूर्यन्ते, जल-प्लावन-आपदा-काले च अनुबन्धकस्य माध्यमेन एव कार्यं कारितं भवति। मुख्यमन्त्रिणा स्पष्टीकृतं यत् लोक-निर्माण-विभागे बेलदार-कर्मचारिणां पदानि पूर्वतन-सर्वकारस्य समयादेव समाप्तानि सन्ति, विभागे च बहुकार्य-कर्मचारिणाम् एव नियुक्तिः कृता आसीत्।

**विद्युत्-मण्डले भविष्यति 'विद्युत्-मित्राणां' नियुक्तिः**

मुख्यमन्त्रिणा प्रोक्तं यत् राज्य-विद्युत्-मण्डले 'विद्युत्-मित्राणि' नियुज्यन्ते। एतदर्थम् अधिशासी-अभियन्त्रे (कार्यकारी-अभियन्त्रे) अधिकाराः प्रदत्ताः सन्ति। अनुबन्धकानां माध्यमेन अस्मिन् स्थानीय-जनेभ्यः वृत्तिः (रोजगारः) दातुं शक्यते।




वस्तुतः मनाली-विधानसभा-क्षेत्रस्य विधायकेन प्रश्नोत्तर-काले अनुपूरक-प्रश्ने आपदा-कालीनायाम् आपत्-स्थितौ विविध-विभागेषु 'लाइनमैन'-खनकानां च बाह्य-स्रोत-आधारेण (Outsource) आवश्यकतायाः विषयः उत्थापितः आसीत्। यस्य प्रत्युत्तरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः उपर्युक्तां सूचनां प्रददत्।
मूल-प्रश्नस्य लिखित-प्रत्युत्तरे मुख्यमन्त्रिणा विज्ञापितं यत् ३१ अक्टूबर् पर्यन्तं मनाली-क्षेत्रे विविध-विभागेषु अनुबन्ध-सहितम् अन्यैः आधारैः कृतानां नियुक्तीनां विवरणं प्रदत्तम्। तत्रैव श्रम-विभागस्य अन्तर्गतं पञ्चाशत् (५०) युवकेभ्यः कौशल-भत्ता तथा षोडशभ्यः (१६) जनेभ्यः अकर्मण्य-भत्ता (बेरोजगारी भत्ता) प्रदत्तः।

## पुनः सम्मुखं सत्तापक्ष-विपक्षौ, विधानसभा-परिसरे परस्परं विरुद्धं कृतं प्रदर्शनम्



हिमसंस्कृतवार्ता — शिमला।
हिमाचलप्रदेश-विधानसभायाः प्रावृट्-सत्रस्य द्वितीये दिने सदनस्य आरम्भः दिवङ्गतेभ्यः पूर्व-विधायकेभ्यः शोक-संवेदना-प्रकटनेन सह अभवत्। अस्मिन् समये सर्वप्रथमं मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः, ततः विपक्षनेता जयरामठाकुरः, तदनन्तरं च मन्त्रिणः अन्ये विधायकाश्च दिवङ्गतेभ्यः पूर्व-विधायकेभ्यः स्व-श्रद्धाञ्जलिं प्राकटयन्। अस्मात् पूर्वं सदनस्य द्वितीय-दिवसस्य कार्यविधेः प्रारम्भात् प्राक् सत्तापक्षः विपक्षश्च विधानसभा-परिसरे परस्परं सम्मुखम् आगतवन्तौ। मुख्यमन्त्रिणः सुक्खू-महोदयस्य अध्यक्षतायां काङ्ग्रेस-विधायक-दलेन हस्तेषु प्रसार-पट्टिकाः (तख्तिकाः) धृत्वा विधानसभा-परिसरे तीव्रं विरोध-प्रदर्शनं कृतम्।अस्मिन् समये सत्तापक्षेण भारतीय-जनता-पक्षस्य (भाजपा) उपरि राष्ट्रगानस्य अपमानस्य आरोपः आरोपितः। अपरपक्षे भाजपा-विधायक-दलेन अपि विधानसभा-परिसरे हस्तेषु पट्टिकाः धृत्वा सर्वकारस्य विरुद्धं प्रदर्शनं विहितम्।
प्रदर्शन-काले भाजपा-विधायकैः पञ्चायती-राज-संस्थानां राजनैतिक-शोषणस्य तथा च अध्यक्ष-उपाध्यक्ष-पदयोः निर्वाचन-स्थगनस्य आरोपम् आरोप्य तीव्राः उद्घोषाः कृताः। एतस्मिन् विरोध-प्रदर्शने सत्तापक्षेण प्रश्नपत्र-स्तेयं लक्ष्यीकृत्य भाजपा-कार्यालयस्य विरुद्धम् अपि उद्घोषाः विहिताः।

## अन्तिमावसरः; 'दारिद्र्य-रेखातः अधस्तन' (BPL) सूच्यां समावेशनार्थं योग्याः परिवाराः २० दिनाङ्कं यावत् कुर्वन्तु आवेदनम्

हिमसंस्कृतवार्ता — शिमला।
हिमाचलप्रदेश-सर्वकारस्य ग्रामीण-विकास-विभागेन योग्यानां परिवाराणां चयनार्थम् अन्तिम-चरणस्य प्रारम्भं कर्तुं निर्णयः स्वीकृतः। सर्वकारेण तेभ्यः परिवारैभ्यः एकः अपरः अवसरः प्रदत्तः, ये गतेषु अष्टसु चरणेषु योग्यतया युक्ताः अपि समये आय-प्रमाणपत्रं वा अन्यानि आवश्यक-प्रमाणपत्राणि उपस्थापयितुं नाशक्नुवन्, येन ते चयन-प्रक्रियायां समाविष्टाः न अभवन्। एतादृशाः परिवाराः अधुना अन्तिमे चरणे आवेदनं कर्तुं शक्ष्यन्ति। सर्वकारेण अस्य कृते आवेदनस्य, प्रमाणीकरणस्य, अन्तिम-सूच्याः प्रकाशनस्य च समय-सीमा अपि निर्धारिता।
ग्रामीण-विकास-विभागस्य सचिवस्य सी. पालरासु-महोदयस्य पक्षतः प्रसारितेन आदेशेन ज्ञायते यत् अन्तिम-चरणे परिवाराणां चयनाय ते एव योग्यता-नियमाः प्रवर्तिष्यन्ते, ये अष्टमे चरणे निर्धारिताः आसन्। अर्थात् यैः परिवारैः पूर्वं निर्धारितानि मानदण्डानि पूरितानि आसन्, किन्तु समये प्रमाणपत्राणाम् अभावात् ते चयन-प्रक्रियायाः बहिः अभवन्, तेभ्यः अधुना स्व-योग्यतां प्रमाणीकर्तुम् अवसरः दीयते।

**आय-प्रमाणपत्रस्य विषये अपि महती सहायता**

अन्तिमे चरणे आवेदनं कुर्वतां परिवाराणां कृते आय-प्रमाणपत्रम् अधिकृत्य अपि सर्वकारेण सान्त्वना दत्ता। आदेशानुसारं ३१ जुलै २०२५ तः ३१ जुलै २०२६ पर्यन्तं निर्गतानि आय-प्रमाणपत्राणि अपि मान्यानि भविष्यन्ति। अनेन तेषां परिवाराणां साहाय्यं भविष्यति येषां पार्श्वे अस्मिन् काले निर्गतानि प्रमाणपत्राणि सन्ति अन्याः च योग्यता-नियमाः पूरयन्ति।
विभागेन स्पष्टीकृतं यत् केवलं सर्वेक्षणे समावेशनेन वा कस्यचित् परिवारस्य योग्य-प्राप्त्या एव तस्य नाम्ना अन्तिम-सूच्यां स्थानं प्राप्तुम् अधिकारः न लप्स्यते। सर्वेषां परिवाराणां योग्यता-परीक्षणं सर्वकारस्य निर्धारित-नियमानाम् आधारेणैव भविष्यति। अन्तिम-




सूची-निर्माण-समये विभागस्य सर्वान् दिशानिर्देशान् निर्धारित-मानदण्डांश्च पालयिष्यन्ति।

**त्रिषु स्तरेषु भविष्यति पत्राणां परीक्षणम्**

अन्तिमे चरणे प्राप्तानां सर्वेषाम् आवेदनानां परीक्षणं विविध-स्तरेषु भविष्यति। प्रथमं ग्राम-स्तरे आवेदनानां प्रमाणपत्राणां च प्रमाणीकरणं विधास्यते। तदनन्तरं खण्ड-स्तरे मण्डल-स्तरे च परीक्षणं भविष्यति।
प्रमाणीकरणस्य संस्तुतेश्च समग्र-प्रक्रिया पूर्व-निर्धारित-नियमानुसारेण पूर्णा भविष्यति। ग्रामीण-विकास-विभागेन मार्च २०२५ मध्ये प्रसारिताः निर्देशाः तदनन्तरं कृतानि संशोधनानि च अस्यां प्रक्रियायां प्रवर्तिष्यन्ते।
सर्वकारेण अन्तिम-चरणाय समय-सीमा निर्धारिता। योग्याः परिवाराः २० सितम्बर २०२६ पर्यन्तम् आवेदनं कर्तुं शक्ष्यन्ति। एतस्मिन् काले एव आवेदनानां प्रमाणीकरणस्य संस्तुतेश्च कार्यानुष्ठानं पूर्णं भविष्यति। ततः परं विभाग-पक्षतः २५ सितम्बर २०२६ पर्यन्तम् अन्तिमा सूची प्रकाशिता भविष्यति।
योग्याः परिवाराः स्वकीयं प्रार्थनापत्रं ग्राम-पञ्चायते, विकास-खण्ड-कार्यालये, उप-मण्डलाधिकारिणः (नागरिकस्य) कार्यालये वा समर्पयितुं शक्ष्यन्ति।
सर्वकारस्य अनेन निर्णयेन तेभ्यः पात्र-परिवारैभ्यः महती सान्त्वना प्राप्स्यते, ये पूर्व-चरणेषु केवलं समये प्रमाणपत्राणाम् अनुपलब्धतायाः कारणात् चयन-प्रक्रियायाः बहिर्भूताः आसन्। एषः तेषां कृते चयन-प्रक्रियायां सम्मेलनाय अन्तिमः अवसरः वर्तते।

# इतिहाससमितेः सञ्चारमाध्यमसमितेश्च पदाधिकारिणः कुलपतिना सह अमिलन्





## "विश्वविद्यालयस्य शैक्षणिक सामाजिक गतिविधिषु सक्रिय भूमिकां निर्वहेयुः इतिहास समितिः सञ्चार माध्यम समितिश्च"- आचार्य ललित कुमार अवस्थी

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा

सरदारपटेल- विश्वविद्यालय मण्डी इत्यस्य इतिहासविभागस्य इतिहाससमितेः सञ्चारमाध्यम-समितेश्च पदाधिकारिणः सदस्याश्च विभागाध्यक्षस्य डॉ. राकेशकुमारशर्मा महोदयस्य नेतृत्वे विश्वविद्यालयस्य माननीय कुलपतिना आचार्य ललितकुमार अवस्थी महोदयेन सह सम्मेलनं कृतवन्तः। अस्मिन् अवसरे समितेः अध्यक्षा मनीषा, उपाध्यक्षश्च लखविन्दरः कुलपतिम् इतिहासविभागेन सञ्चालितानां विभिन्नानाम् अकादमिक- शोध- सहपाठ्यक्रम- सांस्कृतिक-सञ्चारमाध्यमसम्बन्धिनीनां गतिविधीनां विस्तृत सूचनां दत्तवन्तौ।

**कुलपतेः सम्बोधनं प्रेरणा चः-**

अस्मिन् अवसरे कुलपतिः आचार्यः ललितकुमार अवस्थी इतिहासविभागस्य अकादमिक-अन्यगतिविधिषु च सन्तोषं प्रकटयन् छात्राणां सक्रियसहभागितायाः श्लाघां कृतवान्। तेन उक्ताः मुख्यबिन्दवः अधः सन्ति।

1. **निरन्तरं प्रयासः**- सः छात्रान् आहूतवान् यत् ते स्व लक्ष्यं प्रति निरन्तरं प्रयत्नशीलाः भवेयुः, निष्कपटतया, अनुशासनेन, समर्पण भावनेन च स्व कार्याणि उत्कृष्टतां यावत् नेतुं प्रयासं कुर्युः।
2. **ज्ञानपरम्पराः**- कुलपतिः अवदत् यत् भारतस्य गौरवशालिनी ज्ञान परम्परा अस्ति तथा च भारतं प्राचीन कालात् एव विश्वस्य मार्गदर्शनं कृतवान् अस्ति।
3. **नवीनःप्रयोगः**- आचार्य अवस्थी अवदत् यत् विश्वविद्यालयः छात्राणां भविष्यम् उत्तमं कर्तुं निरन्तरं नूतनान् प्रयासान् करोति। विश्वविद्यालये प्रशासनिकसेवानां, विभिन्नप्रतियोगिपरीक्षाणां सज्जतायै एकं विशेषकेन्द्रं स्थापितुं कार्यं प्रचलति।
4. **आर्टिफिशियल इंटेलिजेंस (AI) कोर्सः**- सः एतदपि अवदत् यत् विश्वविद्यालयस्य अकादमिक-गतिविधौ अधिकप्रभावपूर्ण- समकालीनाः च कर्तुं कृत्रिमबुद्धिमत्ता- सम्बद्धाः पाठ्यक्रमाः प्रारभ्यन्ते।
5. **वृत्तेः अवसराः**- छात्रेभ्यः उत्तमवृत्ति- अवसरान् प्रदातुं विश्वविद्यालयः शीघ्रम् एव उद्योगजगतः विभिन्नसंस्थाभिः सह सहमतिज्ञापनं (MoU) कर्तुं दिशि अपि कार्यं करोति।
6. **नेतृत्वक्षमताः**- सः छात्रान् प्रेरयन् अवदत् यत् ते स्वान्तः नेतृत्वक्षमतां, रचनात्मकतां, उत्तरदायित्वस्य भावनां च विकासयेयुः।
7. **विभागाध्यक्षस्य विचारः आभारश्चः-**

अस्मिन् अवसरे इतिहास विभागस्य विभागाध्यक्षः डॉ. राकेशकुमारशर्मा निरन्तरसहयोगस्य मार्गदर्शनस्य च कृते कुलपतिम् आचार्यं ललितकुमार अवस्थीमहोदयम् प्रति आभारं प्रकटितवान्। सः अवदत् यत् कुलपतेः मार्गदर्शनेन विभागस्य अकादमिक सहपाठ्यक्रम-गतिविधिभ्यः नूतनदिशा प्राप्ता अस्ति। विभागः छात्रान् शोध- नेतृत्व- सञ्चारमाध्यम- डिजिटल प्रविधिः- वृत्तिपरककौशलैः च सह योजयितुं निरन्तरं प्रयासरतः अस्ति।

**उपस्थिताः प्रबुद्धजनाः छात्राश्चः-**

इतिहाससमितेः सञ्चारमाध्यमसमितेश्च पदाधिकारिणः सदस्याश्च कुलपतिना सह विभिन्न- शैक्षणिक-छात्रहितसम्बद्धेषु विषयेषु संवादं कृतवन्तः। अस्मिन् अवसरे निम्नसदस्याः उपस्थिताः आसन्-

**प्राध्यापकाः**- विभागाध्यक्षः डॉ. राकेशकुमार शर्मा, समितिसंयोजकः सहायक- आचार्यः विकेश कुमारश्च।

**इतिहाससमितेः पदाधिकारिणः सदस्याश्चः-** अध्यक्षा मनीषा, उपाध्यक्षः लखविन्दरसिंहः, सचिवः अजयकुमारः, संयुक्तसचिवः आकांक्षा, कोषाध्यक्षः वनिताकुमारी, सदस्याः सुशान्तः, श्रिया, शिल्पा, नेहा, तन्वी, सारिका, ममता ठाकुर, भूमिका, रञ्जना कुमारी च।

**सञ्चारमाध्यमसमितेः सदस्याः**- अध्यक्षः मुनीशः, सदस्येषु भुवनेश्वरसिंहः, वन्दनादेवी, तन्मयः, शिवकुमारश्च।

अन्ते छात्राः कुलपतेः मार्गदर्शनस्य प्रेरणादायि-सम्बोधनस्य च कृते तस्य आभारं प्रकटितवन्तः।

## रोहितठाकुरः अवदत् — प्रदेशस्य ९,६१७ विद्यालयेषु प्रथम-कक्षायाः एव आङ्ग्ल-माध्यमस्य विकल्पः उपलब्धः

हिमसंस्कृतवार्ता — शिमला।

शिक्षा-मन्त्री रोहितठाकुरः न्यवेदयत् यत् सम्प्रति प्रदेशस्य सर्वेषु ९,६१७ सर्वकारीय-प्राथमिक-विद्यालयेषु आङ्ग्ल-माध्यमेन शिक्षणं प्रदीयमानम् अस्ति। एतेषु सर्वेषु विद्यालयेषु हिन्दी-माध्यमस्य विकल्पः उपलब्धः वर्तते।

बिलासपुर-मण्डले - ५२६ विद्यालयाः
चम्बा-मण्डले- ११३६ विद्यालयाः
हमीरपुर-मण्डले - ४२५ विद्यालयाः
काङ्गड़ा-मण्डले - १४६५ विद्यालयाः
किन्नौर-मण्डले - १४० विद्यालयाः
कुल्लू-मण्डले - ७१९ विद्यालयाः
लाहुल-मण्डले - १५२ विद्यालयाः
मण्डी-मण्डले - १५२१ विद्यालयाः
शिमला-मण्डले - १३४२ विद्यालयाः
सिरमौर-मण्डले - ९९८ विद्यालयाः
सोलन-मण्डले - ७२५ विद्यालयाः
ऊना-मण्डले - ४६८ विद्यालयाः



एतेषु सर्वेषु प्राथमिक-विद्यालयेषु एषा व्यवस्था प्रवर्तिता अस्ति।

**विद्यार्थिभिः स्वीकृतम् आङ्ग्ल-माध्यमम्**

भारतीय-जनता-पक्षस्य (भाजपा) विधायकस्य डॉ. जनकराजस्य प्रश्नस्य लिखित-सूचनां यच्छन् शिक्षा-मन्त्रिणा प्रोक्तं यत् ३ जनवरी २०२४ दिनाङ्कस्य निर्णयानुसारं छात्रेभ्यः पालकेभ्यश्च पूर्वमेव हिन्दी-आङ्ग्ल-माध्यमयोः अन्यतरस्य चयनस्य विकल्पः प्रदत्तः आसीत्। वर्तमान-समये सर्वेषु विद्यालयेषु विद्यार्थिभिः आङ्ग्ल-माध्यममेव स्वीकृतम्।

# अखिलभारतीयसंस्कृतपरिषदः प्रतियोगितायां प्रिया पाण्डेय प्रथमस्थाने



अखिलभारतीयसंस्कृतपरिषदः, अलीगञ्ज, लखनऊ इत्यस्य तत्त्वावधाने आयोजिते संस्कृतसप्ताहमहोत्सवे संस्कृत-आशुभाषणप्रतियोगितायां प्रिया पाण्डेय प्रथमस्थानं प्राप्तवती। प्रियया प्रतियोगितायां प्रभावशालिनी प्रस्तुति प्रदत्ता। तया स्वीयवाक्पटुता, संस्कृतभाषायां प्रवाहः तथा विषयप्रतिपादनस्य कौशलं प्रदर्शितम्। तस्याः उत्कृष्टप्रदर्शनस्य आधारेण निर्णायकमण्डलेन प्रथमस्थानाय चयनं कृतम्। अस्याः उपलब्धेः कृते अखिलभारतीयसंस्कृतपरिषदः पदाधिकारिभिः, निर्णायकमण्डलेन तथा उपस्थितैः विद्वद्भिः प्रियायाः हार्दिकं अभिनन्दनं कृतम्। परिषदः प्रतिनिधिभिः तस्यै उज्ज्वलभविष्याय शुभकामनाः प्रदत्ताः। प्रियायाः एषा उपलब्धिः संस्कृतभाषायां रुचिमतां छात्राणां कृते प्रेरणादायिनी वर्तते।

# सिरमौरः- शिक्षाधिकारिभिः सह अमिलत् संस्कृत- शिक्षक- परिषदः प्रतिनिधिमण्डलम्





**हिमसंस्कृतवार्ताः- डॉ नरेन्द्रराणा सिरमौरः।**
राजकीय- संस्कृत- शिक्षकपरिषदः सिरमौर- प्रतिनिधिमण्डलेन शिक्षाविभागस्य वरिष्ठैः अधिकारिभिः सह मेलनं कृत्वा संस्कृतशिक्षा- सम्बद्धैः विविधैः महत्त्वपूर्णविषयैः सह विस्तारेण विचारविमर्शः कृतः। प्रतिनिधिमण्डलेन डॉ. मदनलालवर्येण (उपशिक्षानिदेशकः, उच्चशिक्षा, मण्डल- सिरमौरः), राजीवठाकुरवर्येण (उपशिक्षानिदेशकः, प्रारम्भिकशिक्षा, मण्डल- सिरमौरः) इत्येताभ्यां सह मेलनं कृत्वा मुख्यतया द्वौ महत्त्वपूर्णौ विषयौ प्रस्तुतौ।

१. प्रतिनिधिमण्डलेन अधिकारिभ्यः प्रार्थना कृता यत् २५ अगस्ततः ३१ अगस्तपर्यन्तं आयोज्यमानस्य संस्कृतसप्ताहस्य आयोजनं सिरमौरमण्डलस्य प्रत्येकस्मिन् विद्यालये प्रभावरूपेण उत्साहपूर्वकं च भवेत्। परिषदा उक्तं यत् संस्कृतं केवलं कश्चन विषयः नास्ति, अपि तु भारतस्य प्राचीनज्ञानपरम्परायाः, संस्कृतेः, साहित्यस्य, दर्शनस्य संस्काराणां च आधारभूता भाषा अस्ति। विद्यालयस्तरे संस्कृतसप्ताहस्य माध्यमेन छात्रेषु संस्कृतभाषां प्रति रुचिः, गौरवम्, आदरभावः च वर्धयितुं शक्यते। परिषदपक्षतः प्रार्थना कृता यत् मण्डलस्य सर्वेभ्यः विद्यालयेभ्यः संस्कृतसप्ताहस्य आयोजनाय आवश्यकदिशानिर्देशाः अवगच्छेयुः, विद्यालयेषु च संस्कृतेन सम्बद्धानां विविधानां रचनात्मक- गतिविधिनां सम्पादनं सुनिश्चितं भवेयुः।

२. प्रतिनिधिमण्डलेन सिरमौरमण्डले कार्यरतानां शास्त्रिणां न्यायालयीय-विभागीयस्तरेषु लम्बिताः विषयाः अपि अधिकारिणां समक्षं प्रमुखतया स्थापिताः। परिषदा निवेदितं यत् शास्त्रिणां प्रकरणाणि दीर्घकालात् लम्बितानि सन्ति, तेषां विषये विभागीयस्तरे आवश्यकीं कार्यवाहीम् कृत्वा नियमानुसारं शीघ्रातिशीघ्रं समाधानं क्रियेत, येन कर्मचारिणः अनावश्यककष्टानि न प्राप्नुयुः।

अधिकारिणः एतयोः द्वयोः विषययोः सकारात्मकं शीघ्रं च निर्णयं ग्रहीष्यन्ति इति आशा परिषदा व्यक्ता। अस्मिन् अवसरे राजकीय- संस्कृत- शिक्षकपरिषदः (मण्डल-सिरमौरः) अध्यक्षः आचार्यः देवेन्द्रशर्मा, उपाध्यक्षः धनवीरशास्त्री, महा सचिव गोविन्द शर्मा जगदीश शर्मा जगपाल शर्मा परामर्शकः आचार्यराधेश्यामः, प्रतिनिधिः अमित शास्त्री च उपस्थिताः आसन्।

परिषदः अध्यक्षः आचार्यः देवेन्द्रशर्मा अवदत् यत् परिषदः उद्देश्यं संस्कृतभाषायाः संरक्षणेन संवर्धनेन सह संस्कृतशिक्षकाणां प्रश्नान् उचिते मञ्चे उपस्थापयितुम् अस्ति। तेन उक्तं यत् संस्कृतसप्ताहः केवलम् औपचारिकः कार्यक्रमः न भूत्वा छात्रान् समाजं च संस्कृतस्य गौरवपूर्णपरम्परया सह योजयितुं माध्यमः भवेत्।अधिकारिभिः प्रतिनिधिमण्डलाय समयः प्रदत्तः, विषयाः च गम्भीरतया श्रुताः, एतदर्थं परिषदा तेषां कार्तज्ञ्यं कृतम्। सिरमौरमण्डलस्य सर्वेषु विद्यालयेषु संस्कृतसप्ताहः सफलः भविष्यति, लम्बितानां प्रकरणानां च शीघ्रं समाधानं भविष्यति इत्यपि आशा व्यक्ता।

# अखिलभारतीयसंस्कृतपरिषद संस्कृतसप्ताहमहोत्सवः सम्पन्नः





**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।**
अखिलभारतीयसंस्कृतपरिषदः, अलीगञ्ज, लखनऊ इत्यस्य तत्त्वावधानेन द्विदिवसीयः संस्कृत- सप्ताहमहोत्सवः भव्यतया सम्पन्नः। महोत्सवस्य प्रथमदिने २१ अगस्ते छात्राणां कृते संस्कृत- बालगीत- प्रतियोगिता, वरिष्ठछात्राणां च कृते उच्चस्तरीया संस्कृत- आशुभाषण- प्रतियोगिता आयोजिते आस्ताम्। द्वितीयदिने २२ अगस्ते 'भारतीयसंस्कृतेः सन्दर्भे संस्कृत- श्रावणी- उपाकर्म, संस्कृतदिवस, रक्षाबन्धनं वेदपाठशाला च' इति विषये विशिष्टव्याख्यानस्य आयोजनम् अभवत्।

प्रथमदिने लखनऊनगरस्य सरस्वतीविद्यामन्दिरम्, सेक्टर-क्यू, अलीगञ्ज तथा जूनियर बेसिक प्राइमरी पाठशाला कैण्ट इत्यादिभ्यः विद्यालयेभ्यः प्रायः चत्वारिंशत् छात्राः सहभागितां कृतवन्तः। लखनऊ- विश्वविद्यालयस्य संस्कृत- प्राकृत- भाषाविभागात् तथा ज्योतिर्विज्ञानविभागात् अपि प्रायः पञ्चाशत् विद्यार्थिनः उपस्थिताः आसन्।

संस्कृतबालगीतप्रतियोगितायां बालप्रतिभाभिः सुमधुरस्वरेण संस्कृतगीतानि प्रस्तुतानि, वरिष्ठछात्रैश्च आशुभाषणप्रतियोगितायां स्वीयवाक्पटुतायाः भाषिकप्रतिभायाश्च परिचयः प्रदत्तः। प्रतियोगितयोः निर्णायकत्वेन डॉ. रेखाशुक्ला, प्रो. सत्यकेतुः, डॉ. गौरवसिंहः च दायित्वं निर्वहितवन्तः।प्रतियोगितयोः विजेतृभ्यः प्रथमपुरस्कारः ११०० रुप्यकाणि, द्वितीयपुरस्कारः ७०० रुप्यकाणि, तृतीयपुरस्कारः ५०० रुप्यकाणि तथा सान्त्वनापुरस्कारः २५१ रुप्यकाणि निर्धारिताः आसन्। द्वितीयदिने आयोजिते कार्यक्रमे विजेतृभ्यः पुरस्काराः प्रदत्ताः।महोत्सवस्य द्वितीयदिने 'भारतीयसंस्कृतेः सन्दर्भे संस्कृत-श्रावणी- उपाकर्म, संस्कृतदिवस, रक्षाबन्धनं वेदपाठशाला च' इति विषये विशिष्टव्याख्यानम् आयोजितम्। कार्यक्रमे श्रीनेत्रपालगुरुकुलवेदपाठशाला, गङ्गोत्रीविहार, कानपुर- बिठूरस्य आचार्यः अम्बरीषोपाध्यायः मुख्यातिथिरूपेण उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षतां अखिलभारतीयसंस्कृतपरिषदः उपाध्यक्षः डॉ. रविकिशोरत्रिवेदी कृतवान् तथा संयोजनं परिषदः मन्त्री प्रो. प्रयागनारायणमिश्रेण कृतम्। अस्मिन् अवसरे संस्कृत-वेदविद्यारतस्य आचार्य अम्बरीषोपाध्यायस्य विशेषसम्मानः कृतः। संस्कृतजगतः प्रति तेन समर्पणभावेन क्रियमाणां सेवां दृष्ट्वा तस्य अलङ्करणं कृतम्। आचार्येण वेदमन्त्राणां पाठः अपि प्रस्तुतः। तस्य वेदविद्यालयस्य सचिवः शुभम् शुक्लः विशिष्टवक्तृरूपेण उपस्थितः सन् कार्यक्रमस्य महत्त्वं प्रतिपादितवान्।

**चित्रम्- सामूहिकचित्रे अखिलभारतीय- संस्कृतशिक्षकपरिषद् सदस्याः निर्णायकाश्च**

व्याख्याने रक्षाबन्धनस्य पौराणिकविशेषतासु तथा श्रावणी-उपाकर्मणः ऐतिहासिकप्रासङ्गिकतायां च विद्वत्तापूर्णः विचारः प्रस्तुतः। अखिलभारतीय- संस्कृतपरिषदः उपाध्यक्षः डॉ. रविकिशोरत्रिवेदी प्रशासनिकक्षेत्रे संस्कृतस्य उपयोगितां स्वीयानुभवाधारेण प्रकाशयामास।कार्यक्रमस्य सञ्चालनं डॉ. अनिलपोरवालः कृतवान् तथा धन्यवादज्ञापनं डॉ. पत्रिकाजैनेन कृतम्। अस्मिन् अवसरे लखनऊविश्वविद्यालयस्य संस्कृतविभागस्य डॉ. गौरवसिंहः, महिला- कन्या- महाविद्यालयस्य वरिष्ठाध्यापिका डॉ. रीतूसिंहः, प्रो. रेखाशुक्ला, डॉ. नीलमा इत्यादयः अनेकाः विद्वांसः गणमान्याश्च उपस्थिताः आसन्।

कार्यक्रमस्य अन्ते प्रतियोगितासु उत्कृष्टप्रदर्शनं कृतवद्भ्यः छात्रेभ्यः पुरस्काराः प्रदत्ताः। संस्कृतभाषायाः प्रचार-प्रसारं तथा भारतीयसंस्कृतेः संरक्षणं संवर्धनं च लक्ष्यीकृतः अयं द्विदिवसीयः संस्कृतसप्ताहमहोत्सवः संस्कृतानुरागिषु छात्रेषु च उत्साहं प्रेरणां च जनयन् सफलतया सम्पन्नः।

# पञ्चदिवसीय-अन्ताराष्ट्रिय-सङ्गोष्ठी सम्पन्ना



**हिमसंस्कृतवार्ताः-** अम्बालाछावनीस्थे श्रीदीवान- कृष्णकिशोर- सनातनधर्म- आदर्श- संस्कृत- महाविद्यालय- शोधकेन्द्रे च अगस्तमासस्य 17-21 दिनाङ्कं यावत् समजायत। उद्घाटनसत्रे सत्राध्यक्षः कुरुक्षेत्र- विश्वविद्यालयस्य पूर्व-अधिष्ठाता अध्यक्षश्च प्रो. राजेश्वरप्रसादमिश्रः मुख्यातिथिः श्रीलालबहादुर- राष्ट्रिय- संस्कृत- विश्वविद्यालयस्य कुलपतिचरः प्रो. रमेशकुमारपाण्डेयः, सारस्वतातिथिः डीएवी पिहोवा महाविद्यालयस्य पूर्वप्राचार्यः डॉ. कामदेवझाः, विशिष्टातिथिः फिजिदेशतः प्रो. डम्बरूधरपतिः, आस्ट्रेलियादेशतः प्रो. मीनाक्षी श्रीनिवासन आसन्। प्रथमदिवसे वेदसत्रे सत्राध्यक्षः प्रो. राजेश्वरप्रसादमिश्रः सारस्वतातिथिश्च प्रो. मनोजकुमारमिश्रः आस्ताम्। द्वितीयदिवसे व्याकरणसत्रे सत्राध्यक्षौ डॉ. कामदेवझाः, डॉ. प्रियव्रतमिश्रः, सारस्वततिथी डॉ. दीपेशकतिरा, डॉ. रामचन्द्रश्चासन्। तृतीयदिवसे ज्योतिषसत्रे सत्राध्यक्षः प्रो. विनोदकुमारशर्मा, सारस्वततिथिः डॉ. नरेशशर्मा समन्वयः डॉ. श्यामनाथझाः चास्ताम्। चतुर्थदिवसे साहित्यसत्रे सत्राध्यक्षाः प्रो. चन्द्रकुमारझाः प्रो. सनन्दनकुमार त्रिपाठी, प्रो. सुज्ञानकुमारमाहान्तिः, सारस्वततिथियः डॉ. राकेशकुमारजैनः, प्रो. नीरजशर्मा, प्रो. परागजोशी चासन्। आधुनिकविभागीयसत्रे सत्राध्यक्षौ प्रो. सतीशपाण्डेयः, डॉ. असीमा श्रवण, सारस्वततिथिः डॉ. विष्णुशर्मा चासन्।
अस्याः सङ्गोष्ठ्याः सम्पूर्तिसत्रं 21.08.2026 तमे दिनाङ्के सुसम्पन्नम्। तत्र सत्राध्यक्षत्वपदमलङ्कार्षीत् केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलसचिवः प्रो. आर. जि. मुरलीकृष्णवर्यः। मुख्यातिथिः उत्तराखण्ड- संस्कृत। विश्वविद्यालयस्य कुलपतिः प्रो. रमाकान्तपाण्डेयः आसीत्। ते शोधसङ्गोष्ठ्याः केन्द्रविषयमवलम्ब्य आधुनिकसमाजे तस्य सर्वत्र प्रासङ्गिकतोपादेयता चेत्याहुः। सहैव एतादृश्याः सङ्गोष्ठ्याः समाजस्थकुरीतीनां निवारणाय सर्वत्र भवितव्येति अवादीत्। जर्मनीतः विशिष्टातिथिना डॉ.रामप्रसादभट्टेण संस्कृतसंस्कृत्योश्च माहात्म्यं प्रतिपाद्य संस्कृतज्ञानां जर्मनीदेशे पूजास्थानमवाचि। मॉरीशसदेशीया विशिष्टातिथिः सवितातिवारी तद्देशे भारतीयसंस्कृतसंस्कृत्योः ऐतिह्यं समुपस्थाप्य स्वानुभूतिजन्यसंस्मरणं प्रास्तौत्। इंग्लैण्डदेशीयः विशिष्टातिथिः माधवकुमारतुरुमल्लामहोदयः वैश्विककल्याणाय हिन्दूधर्मस्य प्रासङ्गिकता, संस्कृतस्य महत्त्वं प्रतिपाद्य समाजोत्कर्षाय संस्कृतमावश्यकमिति अभणत्। अस्यां सङ्गोष्ठ्यां 12 सत्राणि, 34 अतिथयः, 72 विद्वांसः, 45 शोधार्थिनः, फीजि- आस्ट्रेलिया- इंग्लैण्ड- मॉरिशस- जापान- जर्मनीदेशानां वैदेशिक- प्रतिनिधित्वं, 17 राज्यानां विद्वांसः शोधार्थिनश्च प्रतिभागमकार्षुः। अस्यां सङ्गोष्ठ्यां 117 शोधपत्राणि प्रस्तुतानीत्थं संयोजकत्वेन डॉ. राकेशकुमारजैनेन समस्तसङ्गोष्ठ्याः संक्षिप्तविवरणं प्रस्तुतम्। सरस्वत्यर्चनेन दीपप्रज्वालनेन च कार्यक्रमस्य शुभारम्भः जातः। प्राचार्येण डॉ. विष्णुदत्तशर्मणा अतिथीनां विदुषां परिचयपुरस्सरं स्वागतं व्याहृतम्। मङ्गलाचरणं डॉ. मनीषभारद्वाजः, डॉ. बुद्धिबल्लभाभ्यां च अकार्ष्टाम्। कार्तज्ञ्यं डॉ. श्यामनाथझावर्येण विहितम्। सत्रसञ्चालनं डॉ. विपिनकुमारेण अकारि। विशिष्टतकनीकीसहयोगः डॉ. वीरेन्द्रप्रकाशेन प्रदत्तः। अस्मिन् पावनावसरे महाविद्यालयस्य प्राध्यापकाः डॉ. मनोजकुमारदुबे, डॉ. वीरेन्द्रशर्मा, डॉ. रेणूवत्सः, डॉ. नितिनकुमारः, डॉ. गगनदीपसिंहः सर्वे छात्राः कर्मचारिणश्च समुपस्थिताः आसन्। राष्ट्रगीतेन सभायाः समापनमवभवत्।

# लखनऊनगरे उत्तरप्रदेश-जापानयोः निवेशसम्मेलनम्




**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।**
प्रधानमन्त्रिणः नरेन्द्रमोदिनः मार्गदर्शने तथा उत्तरप्रदेशस्य मुख्यमन्त्रिणः योगी आदित्यनाथस्य नेतृत्वे उत्तरप्रदेशं वैश्विकनिवेशस्य प्रमुखकेन्द्ररूपेण स्थापयितुं निरन्तरं प्रयासाः क्रियमाणाः सन्ति। अस्यैव क्रमस्य अन्तर्गतं उत्तरप्रदेशस्य जापानस्य च मध्ये आर्थिकसाझेदारीं सुदृढां कर्तुं उत्तरप्रदेश-जापाननिवेशसम्मेलनम्–२०२६ लखनऊनगरे आयोजितम्। सम्मेलने जापानस्य यामानाशी-प्रान्तस्य राज्यपालः कोटारो नागासाकी सहितं जापानतः प्रायः द्विशतसदस्यीयं प्रतिनिधिमण्डलं सहभागितां कृतवान्। प्रतिनिधिमण्डले मुख्यकार्यपालकाधिकारिणः, प्रबन्धनिदेशकाः, कन्ट्रीहेड्-पदाधिकारिणः, व्यावसायिकनेतारः तथा प्रमुखनिर्णयकर्तारः सम्मिलिताः आसन्।सम्मेलनस्य माध्यमेन जापानी-उद्योगजगतः समक्षं उत्तरप्रदेशस्य निवेशसम्भावनाः, औद्योगिकक्षमता- विकासस्य च अवसराः प्रस्तुताः। जापानी- उद्योगानां प्रदेशे निवेशाय आकर्षणं तथा आर्थिक-औद्योगिकसहयोगस्य विस्तारः सम्मेलनस्य प्रमुखः उद्देश्यः आसीत्। उत्तरप्रदेशसर्वकारस्य नीतयः, सुदृढम् आधारभूतसंरचनं, कुशलं मानवसंसाधनम्, अनुकूलं व्यावसायिकवातावरणं च जापानस्य तकनीकीविशेषज्ञतया, गुणवत्तया नवाचारेण च संयोज्य निवेशस्य औद्योगिक- सहयोगस्य च नूतनाः अवसराः सृज्यन्ते। एतादृशः सहयोगः प्रदेशे निवेशं वर्धयितुं, रोजगारस्य अवसरान् सृजितुं, नवीनप्रौद्योगिकीनां प्रसारं कर्तुं तथा आर्थिकविकासाय नूतनां गतिं प्रदातुं च सहायकः भविष्यति। सम्मेलनस्य आयोजनं २१ अगस्त-दिनाङ्के प्रातः दशवादने लखनऊस्थिते इन्दिरागान्धीप्रतिष्ठाने कृतम्।

# लखनऊ- एकविंशतिदिवसीयः ऑनलाइन- संस्कृत- सम्भाषणवर्गस्य सम्पूर्तिसमारोहः सम्पन्नः

**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः, लखनऊ।**
संस्कृतभारत्या आयोजितस्य एकविंशति- दिवसीयस्य ऑनलाइन- संस्कृत- सम्भाषणवर्गस्य सम्पूर्तिसमारोहः त्रयोदशे अगस्तदिनाङ्के आभासीयमाध्यमेन उत्साहपूर्वकं सम्पन्नः। जुलाईमासस्य द्वाविंशतितः आरब्धे अस्मिन् वर्गे प्रतिभागिभ्यः संस्कृतभाषां सरलतया, सहजतया, व्यवहारिकरूपेण च अधिगन्तुं, संस्कृते सम्भाषणस्य नियमिताभ्यासं च कर्तुं प्रशिक्षणं प्रदत्तम्। कार्यक्रमस्य शुभारम्भः प्रिन्शुक्लेन वैदिकमङ्गलाचरणेन, प्रिया लौकिकमङ्गलाचरणेन कृतः। ततः वर्गस्य प्रशिक्षिका शिखामिश्रा स्वागतभाषणं प्रस्तुत्य उपस्थितानाम् अतिथीनां प्रतिभागिनां च स्वागतं कृतवती। शिवामिश्रया स्वागतगीतं संस्कृतगीतं च प्रस्तुतम्। समारोहस्य मुख्यातिथिः आदरणीयः डॉ. अनिलकुमारः, संस्कृतभारत्याः अवधप्रान्तमन्त्री, स्वीयसम्बोधने संस्कृत-सम्भाषणस्य महत्त्वं प्रतिपाद्य प्रतिभागिनः संस्कृतस्य निरन्तराभ्यासाय प्रचार-प्रसाराय च प्रेरितवान्। समारोहस्य अवसरे प्रतिभागिभिः रामांश, श्वेता तथा शुभाङ्गेन एकविंशतिदिवसीयस्य वर्गस्य स्वानुभवाः प्रस्तुताः। तैः उक्तं यत् नियमिताभ्यासेन संस्कृतभाषायां सम्भाषणस्य आत्मविश्वासः वर्धितः तथा संस्कृतभाषायाः दैनिकजीवने प्रयोगाय प्रेरणा प्राप्ता। कार्यक्रमस्य सञ्चालनं सत्येन्द्रपाठकः कृतवान्। तेन वर्गस्य गतिविधीनाम् उपलब्धीनां च उल्लेखं कुर्वता प्रतिपादितं यत् संस्कृत- सम्भाषणस्य यात्रा सम्पूर्या समाप्ता न भवति, अपितु अधुना तस्याः निरन्तरं दैनिकजीवने प्रयोगस्य संकल्पः करणीयः। कार्यक्रमस्य अन्ते सत्येन्द्रपाठकेन मुख्यातिथये, प्रशिक्षिकायै, सर्वेभ्यः प्रतिभागिभ्यः, प्रस्तुतिकर्तृभ्यः सहयोगिभ्यश्च कृतज्ञता




ज्ञापिता। संगीतया शान्तिमन्त्रस्य पाठेन समारोहस्य समापनं सम्पन्नम्। अवसरेऽस्मिन् सर्वैः प्रतिभागिभिः संस्कृतं निरन्तरं वक्तुं, पठितुं, प्रचारयितुं च संकल्पः कृतः।

# महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयपरिसरे त्रिदिवसीय- अन्तरिक्षज्ञानपर्वणः शुभारम्भः





**हिमसंस्कृतवार्ताः- डॉ. विजयकुमारः**

गतशुक्रवासरे महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयस्य ज्योतिर्विज्ञानविभागद्वारा अन्तरिक्षदिवसस्योपलक्ष्ये त्रिदिवसीय अन्तरिक्षज्ञानपर्वणः उद्घाटनं सम्पन्नम्। अयं कार्यक्रमः माननीयकुलगुरूणां प्रो. शिवशङ्करमिश्रवर्याणां अध्यक्षतायां सम्पन्नः। अयं कार्यक्रमः छात्रेषु खगोलीयज्ञानाभिवृद्धये तेषाम् अभिरुच्यानुसारं कार्यक्रमे सहभागीकरणं च मुख्योद्देश्यं कृत्वा आयोजितः। कार्यक्रमे जीवाजीवेधशालायाः अधीक्षकः डॉ. राजेन्द्रप्रकाशगुप्तः मुख्यातिथिरूपेण उपस्थितः आसीत्। तेन छात्रान् सहभागीकरणं कुर्वता पी.पी.टी. माध्यमेन स्वीयं वक्तव्यं प्रस्तुतम्। तेन अन्तरिक्षसम्बद्धानां विविधगतिविधीनामोल्लेखं कुर्वता आदित्य-एल.-1, चन्द्रयानसम्बद्धानां यात्राणाञ्च यथार्थचित्रणं कृत्वा स्वीयं वक्तव्यं प्रस्तुतम्। तेन उक्तं यत् अन्तरिक्षदिवसः एकः अवसरः अस्ति यत्र छात्राः वैज्ञानिकदृष्ट्या ज्योतिषशास्त्रीयसन्दर्भान् अवगन्तुं शक्नुवन्ति।

कार्यक्रमस्य अध्यक्षतां कुर्वन् माननीयः कुलगुरुः प्रो. शिवशङ्करमिश्रमहोदयः अवदत् यत् अद्यतनदिने छात्रैः ज्ञानविज्ञानयोः सम्बन्धस्य सक्रियतया अवगमनस्य आवश्यकता वर्तते। छात्राः केवलं शास्त्रीयज्ञानं न प्राप्नुयुः, अपि तु वैज्ञानिकपद्धत्या तज्ज्ञानं सामाजिकस्तरे प्रसारयितुं प्रयत्नशीलाः भवेयुः एतत् अध्यापकानां छात्राणां च दायित्वम् अस्ति। तेन अस्य दिवसस्य मूर्तरूपप्रदानाय छात्राणां सहभागितायै च संयोजकाय छात्रेभ्यश्च शुभकामनाः प्रदत्ताः। कार्यक्रमस्य प्रथमदिवसस्य उद्घाटनसत्रे 'हर आँगन आकाश' प्रतियोगितायां स्थानं प्राप्तेभ्यः छात्रेभ्यः पुरस्काराः प्रदत्ताः। अस्यां प्रतियोगितायां ऋतुविज्ञानाधारितविषयेषु छात्रैः समाजे चर्चा-परिचर्चा, पञ्चाङ्गस्याधारेण ज्योतिषीयविश्लेषणं कृत्वा तस्य चलचित्रमाध्यमेन प्रदर्शनं करणीयम् आसीत्। प्रतियोगितायां प्रथमस्थानं राजनन्दिनी, द्वितीयस्थानं युजवेन्द्रचन्देलः तथा तृतीयस्थानं भूमिचिरागभट्टश्च प्राप्तम्। कार्यक्रमे संकायाध्यक्षः डॉ. हरेन्द्रभार्गवः, विभागसमन्वयकः डॉ. तुलसीदासपरौहावर्यः, डॉ.अखिलेशद्विवेदीमहोदयः, डॉ. पूजा उपाध्याया, अन्ये आचार्याः छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य प्रस्तावना ज्योतिर्विज्ञानविभागाध्यक्षेण डॉ. शुभम्शर्मणा कृता। स्वागतभाषणं डॉ. अविनाशमिश्रेण, सञ्चालनं डॉ. रुपेशमिश्रेण, धन्यवादज्ञापनं डॉ. विजयकुमारेण कृतम्।

# लोकहिताधारित-नगरविकासार्थं पाटलिपुत्र-उपग्रह-नगर्याः (टाउनशिप) विकासाय हितधारकैः विचार-विमर्शः





- **नागरिकहितं सर्वोपरि, पाटलिपुत्र-नगर्याः विकासे हितधारकाणां मन्थनम्**
- **योजनाबद्धविकासात् संवृद्धिं प्रति श्रेष्ठतरं नगरम्, श्रेष्ठतराःअवसराः, श्रेष्ठतरं बिहारम्**

**पाटलिपुत्रम्, हिमसंस्कृतवार्ता, राघवनाथझा,**

"विभागेन योजनाम् अधिकाधिकं व्यापिकाम् सहभागिनीं च विधातुं हितधारकैः सह संवादस्य विस्तृतः कार्यक्रमः विरचितः, यस्य अन्तर्गतम् अद्य प्रथमः संवादः प्रस्थापितः। अस्यामेव संवाद-शृङ्खलायां कृषकाणां भूस्वामिनां च समीपं गत्वा तेभ्यः योजनायाः विविधानां पक्षाणां सविस्तरं ज्ञानं प्रदास्यते, तथा च तेषां परामर्शाः विचाराश्च गाम्भीर्येण श्रोष्यन्ते। अस्याः योजनायाः साफल्यस्य मूलाधारः व्यापिका जनसहभागिता निरन्तरः संवादश्च वर्तते। विशेषरूपेण येषां भूस्वामिनां भूमिः अस्याः योजनायाः परिधौ आगच्छति, तैः सह प्रत्यक्षसंवादः विमर्शश्च विधास्यते, येन तेषां मन्तव्यम् अवबुध्य तेषां सहभागितया संमत्या च योजना अग्रेसरीकर्तुं शक्येत्।

## अग्रेऽपि एषा संवाद-विमर्श-प्रक्रिया निरन्तरं प्रचलिष्यति।" — नीतीश-मिश्रः

हरितक्षेत्र-उपग्रह-नगरी (ग्रीनफील्ड सैटेलाइट टाउनशिप) केवलं नूतननगराणां निर्माणयोजना नास्ति; अपि तु बिहारराज्यस्य नगराणां भविष्यम् अद्यैव सुव्यवस्थितरूपेण नियोजयितुम् एकः स्तुत्यः प्रयासः अस्ति। अस्य भविष्यस्य निर्माणे कृषकाः, भूस्वामिनः, स्थानीयसमुदायाः, शासनं तथा च अन्ये हितधारकाः — सर्वेऽपि महत्त्वपूर्णाः सहभागिनः सन्ति।

एतदेव मनसि निधाय नगरविकास-एवं-आवास-विभागेन, बिहारसर्वकारेण 'पाटलिपुत्र-हरितक्षेत्र-उपग्रह-नगरी-विकास-योजना २०४७' इत्यस्य प्रारूपं सर्वसाधारणजनेभ्यः विविधेभ्यः हितधारकेभ्यश्च परामर्शापत्तीः आमन्त्रयितुं प्रकाशितम्। अस्यैवालोके अद्य ऊर्जा-सभागारे, पाटलिपुत्रे, नगरविकास-एवं-आवास-विभागस्य माननीयमन्त्रिणः श्रीनीतीशमिश्रस्य अध्यक्षतया एका महत्त्वपूर्णा हितधारक-परामर्श-गोष्ठी समायोजिता। अस्यां गोष्ठ्यां विभागस्य प्रधानसचिवाः श्रीविनयकुमारः, विभागस्य सचिवाः श्रीसन्दीपकमार-आर-पुडकलकट्टी, प्रबन्धनिदेशक-सह-सचिवाः श्रीअनिमेषकमार-पराशरः, बिहार-राज्य-आवास-मण्डलस्य प्रबन्धनिदेशक-सह-विशेषसचिवाः श्रीनीलेश-रामचन्द्र-देवरे, पाटलिपुत्र-नगरनिगमस्य नगरायुक्ताः श्रीयशपाल-मीणा, विशेषसचिवाः श्रीशाहिद-परवेज़ः, अपर-सचिवाः श्रीममोज-कुमारः इत्येभिः सह अन्याः वरिष्ठाधिकारिणः उपस्थिताः आसन्। एतदतिरिच्य नगर-एवं-क्षेत्रीय-नियोजन-सङ्घटनस्य अधिकारिणः, विविधानां नगरनिगमानां नगरायुक्ताः, क्रेडाई (CREDAI) बिहार, बिहार-उद्योग-सङ्घः, बिहार-वाणिज्य-मण्डलम्, राज्यस्तरीय-बैंकर्स-समित्याः सदस्य-वित्तकोषाः, ITPI, IIA तथा च IEI इत्येतेषां संस्थानां प्रतिनिधयः भागं गृहीतवन्तः। गोष्ठ्यां पाटलिपुत्र-हरितक्षेत्र-उपग्रह-नगर्याः प्रस्तावित-विकास-प्रतिरूपे (मॉडल्) विस्तृतं प्रस्तुतीकरणं दत्तम् तथा हितधारकेभ्यः प्राप्तानां परामर्शानाम् उपरि विचारविमर्शः विहितः।

वर्धमानया जनसङ्ख्यया आर्थिकक्रियाकलापैश्च बिहारस्य वर्तमानेषु नगरेषु निरन्तरं जनभारः वर्धते। हरितक्षेत्र-नगरी इमं भारं सन्तुलितं कर्तुं तथा नूतनावास-रोजगार-निवेश-व्यापाराणाम् अवसरान् प्रदातुं महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नोति। पाटलिपुत्र-नगरी-सदृशानि सुनियोजितानि नगरीयक्षेत्राणि पाटलिपुत्रस्य विकासं नूतनां दिशं दातुं क्षेत्रीयस्तरे च आर्थिकगतिविधीन् प्रोत्साहयितुं समर्थानि सन्ति।

## पाटलिपुत्र-हरितक्षेत्र-उपग्रह-नगर्याः स्वरूपम्, व्याप्तिः, भावि-योजना च

अद्यतनी योजना एव श्वस्तनस्य श्रेष्ठनगरस्य आधारशिला वर्तते। बिहारे हरितक्षेत्र-उपग्रह-नगर्याः अवधारणायाः उद्देश्यं भविष्योन्मुख-नगरीय-विकासम् अद्यैव योजनाबद्धं करणम् अस्ति। अस्य लक्ष्यं केवलं नूतनभवनानां निर्माणं न, अपि तु तादृशस्य सम्पूर्णस्य, सुव्यवस्थितस्य, आधुनिकस्य च नगरक्षेत्रस्य निर्माणम् अस्ति यत्र आवासः, वृत्तिः (रोजगारः), मार्गः, लोकपरिवहनम्, शिक्षा, स्वास्थ्यम्, विपणिः, उद्यानं, जलापूर्तिः, जलनिस्सारणम् (सीवरेज) अन्याश्च अत्यावश्यकाः सौविध्य-सुविधाः युगपदेव विकसिताः भवेयुः। अत्र मुख्यं वैशिष्ट्यं यत् टाउनशिप-क्षेत्रे निवसन्तः भूमिं धारयन्तो जनाः केवलं मूकदर्शकाः न भविष्यन्ति, अपि तु सक्रियाः सहभागिनः भविष्यन्ति।

पाटलिपुत्र-नगर्याः प्रस्तावितं क्षेत्रं नवसु (९) मण्डलेषु (प्रखण्डेषु) स्थितेषु २७३ ग्रामेषु विस्तृतम् अस्ति। अस्मिन् पुनपुन, नौबतपुर, मसौढ़ी, फतुहा, सम्पतचक, पाटलिपुत्र-ग्रामीण, धनरूआ, दनियावाँ तथा फुलवारी-प्रखण्डानां क्षेत्राणि अन्तर्भवन्ति। विशेषक्षेत्रान्तर्गते द्वे नागरीयक्षेत्रे अपि सम्मिलिते स्तः—नौबतपुर-नगरपञ्चायतः (आंशिकः) तथा पुनपुन-नगरपञ्चायतः (पूर्णः)। अस्याः नगर्याः कुलप्रस्तावितं क्षेत्रफलम् प्रायः ८१,७३० एकड्-परिमितम् अस्ति। अस्यान्तर्गते ३,००८ एकड्-परिमितस्य 'कोर-एरिया' (केन्द्रक्षेत्रम्) प्रस्तावितम्, यस्मिन् पुनपुन-प्रखण्डस्य १९ ग्रामाः समाविष्टाः सन्ति।

# गयाजी-क्षेत्रे कृषिजणकल्याणसंवादः : "जनकल्याणं कृषककल्याणञ्च असमच्छामनस्य सर्वोच्चा प्राथमिकता"





- **युवानः कृषिक्षेत्रेण संयोज्य आत्मनिर्भरबिहारस्य निर्माणे सहभागिनः भवन्तु**
- **कृषिसम्बद्धानां महिला-उद्यमिनां, यूनां रोजगारस्य तथा श्रमिकाणाम् उत्थानस्य च लप्स्यते नवीना गतिः~ श्रीविजयकुमारसिंहः**

**गयाजी, हिमसंस्कृतवार्ता, राघवनाथझा**

माननीयानां कृषिमन्त्रिणां श्रीविजयकुमारसिंहमहोदयानाम् अध्यक्षत्वे अद्य गयाजी-क्षेत्रे "कृषि-जनकल्याण-संवादः" इत्याख्यः भव्यः कार्यक्रमः आयोजितः। अनेन कार्यक्रमेण कृषकैः सह साक्षात् संवादं विधाय तेषां समस्याः, परामर्शाः, अपेक्षाश्च समवगताः। सहैव, कृषिक्षेत्रस्य सर्वाङ्गीणविकासाय कृषकेभ्यः योजनानां प्रभाविश्रेष्ठलाभप्रदानाय च सर्वकारस्य नीतिषु योजनासु च सविस्तरं विचारविमर्शः कृतः।

माननीयैः मन्त्रिभिः कृषकसमृद्धिः, महिला-उद्यमिता, युवरोजगारः तथा श्रमोत्थानम् इत्यादिषु महत्त्वपूर्णविषयेषु कृषकैः उपस्थिजनैश्च सह संवादः सम्पादितः।

अस्मिन् अवसरे कृषकैः कृषिसम्बद्धाः विविधाः समस्याः परामर्शाश्च मन्त्रिमहोदयानां समक्षं स्थापिताः। मन्त्रिमहोदयैः सम्प्राप्ताः आक्षेपाः समस्याश्च गम्भीरतया गृहीत्वा सम्बद्धपदाधिकारिभ्यः समस्यानां त्वरितसमाधानाय शीघ्रातिशीघ्रं च कार्यसञ्चालनाय निर्देशः प्रदत्तः।

**प्राकृतिककृषये जनान्दोलनरूपप्रदानाय आह्वानम्**

सभां सम्बोधयन्तः माननीयकृषिमन्त्रिणः श्रीविजयकुमारसिंहमहोदयाः अकथयन् यत् कृषकाणां समृद्ध्या सहैव मृत्तिकायाः, जलस्य, पर्यावरणस्य च संरक्षणं कृषिनेतेः महती प्राथमिकता अस्ति। तैः प्राकृतिककृषेः लाभानां विशदीकरणं कुर्वद्भिः उक्तं यत् प्राकृतिककृष्या भूमेः उर्वराशक्तेः स्वास्थ्यस्य च संवर्धनं भवति, सहैव कृषि-व्ययस्य न्यूनीकरणेऽपि साहाय्यं प्राप्यते।

तैः रासायनिक-उर्वरकाणां कीटनाशकानां चात्यधिक-अमर्यादित-उपयोगेन जायमानानां दुष्प्रभावाणां विषये कृषकाः सचेतनीकृताः। माननीयमन्त्रिभिः कृषकाः अनुरुद्धाः यत् ते स्वकीयायाः कुलकृषिभूमेः न्यूनातिन्यूनम् एकतृतीयांशभागे प्राकृतिककृषिम् अवश्यं स्वीकुर्युः। तैः स्पष्टीकृतं यत् प्राकृतिककृषेः व्यापकाङ्गीकरणेन बिहारस्य कृषिः अधिका सुदृढा, सुरक्षिता, लाभप्रदा च भविष्यति।

**कृषकाणां श्रमस्य समादरः**

माननीयकृषिमन्त्रिभिः कृषिक्षेत्रे उत्कृष्टकार्यं कृतवन्तः कृषकाः सम्भाविताः अभिनन्दिताश्च। मन्त्रिमहोदयैः उक्तं यत् कृषकाणां कठोरपरिश्रमः, नवीनान्वेषणं, नूतनप्रविधीनां स्वीकरणक्षमता च बिहारस्य कृषिक्षेत्रं नूतनोन्नतिं नेतुं महत्त्वपूर्णां भूमिकां निर्वहन्ति।

**आधुनिककृषितन्त्रज्ञानसंवर्धने बलम्**

कृषिजणकल्याणसंवादस्य उद्घाटनसत्रे बिहारविधानसभायाः माननीयाः सभापतयः डॉ. प्रेमकुमारमहोदयाः अपि समुपस्थिताः आसन्। स्वकीयभाषणे तैः कृषिक्षेत्रे आधुनिकानाम् उन्नतानां तन्त्रज्ञानानां व्यापकोपयोगे बलं दत्तम्। तैः सूक्ष्मसेचनप्रणाल्याः, ड्रोन-यन्त्राणां तथा नूतनप्रविधीनां प्रयोगवर्धनस्य आवश्यकतां प्रतिपादयद्भिः उक्तं यत् तन्त्रज्ञानस्य प्रभावीप्रयोगेण कृषेः उत्पादकता वर्धते, कृषकाणाम् आयवृद्धिः भवति तथा कृषिः अधिका लाभकरी संजायते।

**कृषियोजनानां विस्तृतावबोधनम्**

कार्यक्रमे कृषिविभागस्य अधिकारिभिः विभागसञ्चालितानां विविधानां कृषिसम्बद्ध-जनकल्याणकारी-योजनानां विस्तृतविवरणं कृषकेभ्यः समर्पितम्। अधिकारिभिः योजनानाम् उद्देश्यानि, पात्रता, कृषकेभ्यः प्राप्यमाणाः लाभाश्च विस्तरेण प्रतिपादिताः। माननीयैः कृषिमन्त्रिभिः प्रतिपादितं यत् सर्वकारस्य लक्ष्यं केवलं योजनानिर्माणं नास्ति, अपितु तासां साक्षात् प्रभावी च लाभः कृषकेभ्यः प्रदेयः अस्ति। कृषकाणां समस्यानां निवारणं तेषाम् आयसमृद्धिवर्धनमेव कृषिविभागस्य मूललक्ष्यमस्ति। गयाजी-क्षेत्रे समायोजिते अस्मिन् बृहत्-संवादे द्विसहस्राधिकाः (२०००+) कृषकाः सोत्साहं भागं गृहीतवन्तः। कार्यक्रमेऽस्मिन् अतरी-विधानसभायाः माननीयाः विधायकाः श्रीरोमितकुमारमहोदयाः, कृषिविभागस्य विभागानां वरिष्ठाः प्रशासनिकपदाधिकारिणश्च समुपस्थिताः आसन्

# विश्वोद्यमितादिवसोपलक्षे मधुबनी-नगरे 'व्यापारविस्तारः विपणिप्रवेशश्च इत्याख्यस्य विशिष्टकार्यक्रमस्य भव्यम् आयोजनम्।



## – मधुबनी-जनपदस्य नवोद्यम-उद्यमिता-पारिस्थितिक्याः (Startup Ecosystem) सुदृढीकरणाय महत्त्वपूर्णः उपक्रमः।

**मधुबनी,हिमसंस्कृतवार्ता, राघवनाथझा**

२१ आगस्त दिनाङ्के विश्वोद्यमितादिवसस्य मङ्गलावसरे राजकीय-अभियन्त्रण-महाविद्यालयस्य (GEC, मधुबनी) नवोद्यम-प्रकोष्ठेन बिहारसर्वकारस्य उद्योगविभागस्य 'स्टार्टअप-बिहार' इत्यस्य सहयोगात् "व्यापारविस्तारः विपणिप्रवेशश्च" इति विषये एकस्य विशेषाभियानस्य आयोजनं विहितम्। महाविद्यालयस्य सभागारे समायोजितेऽस्मिन् सम्मेलने छात्राः, युवा-नवोद्यमिनः, विद्वांसः प्राध्यापकाश्च सोत्साहं समुपस्थिताः आसन्।

कार्यक्रमारम्भे मण्डल-नवोद्यम-समन्वयकेन श्रीकुमारहार्दिकेन स्वागताभिभाषणं कृतम्। तैः गतेषु त्रिषु वर्षेषु मधुबनी-मण्डले संवर्धितानां नवोद्यमानां तथा सुदृढ-उद्यमिता-परिवेशस्य विकासाय कृतानां प्रयत्नानां विषये विस्तृतं विवरणं प्रस्तुतम्। तैः प्रतिपादितं यत् नवोद्यम-प्रकोष्ठस्य परमं लक्ष्यं केवलं योजनाज्ञानप्रदानं नास्ति, अपितु संकल्पनातः नवोद्यमं प्रति, नवोद्यमात् विपणिं प्रति तथा विपणेः व्यापारविस्तारं प्रति यात्रायै सम्पूर्णमार्गदर्शनं सम्बलञ्च प्रदातुं वर्तते।

मुख्यातिथिरूपेण समुपस्थिताः उद्योगविशेषज्ञाः, 'फिनलिजेन-एलएलपी' इत्यस्य संस्थापकाः सीए-श्रीअमितकुमारमहोदयाः व्यापारविस्तार-विपणिप्रवेश-विषये व्यावहारिकमार्गदर्शनं प्रदत्तवन्तः। तैः व्यापारस्य परिमाणविस्तारः, नूतनविपणिषु प्रवेशः, ग्राहकनिर्माणम्, विपणनरणनीतिः तथा दीर्घकालीन-व्यापार-प्रतिमानस्य सूक्ष्माः अंशाः विशदीकृताः।

अनन्तरं 'अदश्री-ग्रूप्स्' इत्यस्य संस्थापकाः श्रीआशीषपाञ्जियारमहोदयाः तथा 'नोमॅडिक्' इत्यस्य संस्थापकाः श्रीअतीन्द्रकुमारमिश्रमहोदयाः स्वकीयां नवोद्यमयात्रां समुपस्थापितवन्तः। द्वाभ्यामपि उद्यमिभ्यां संकल्पनातः उद्यमनिर्माणपर्यन्तं प्राप्तानां संकटानाम्, असफलतानाम्, अनुभवानां तथा सफल-उद्यमस्थापनायै आवश्यकस्य 'संस्थापक-मनोभावस्य' विषये युवानः प्रेरिताः। अस्मिन् प्रसङ्गे जिला-उद्योग-केन्द्रस्य (मधुबनी) महाप्रबन्धकैः श्रीअमितविक्रमभारद्वाजमहोदयैः बिहारराज्यस्य उद्यमिता-पारिस्थितिक्याः उद्योगविभागस्य च नूतनोपक्रमाणां विषये प्रकाशः पातितः। तैः युवानः नवान्वेषणाय सर्वकारीयाणां साहाय्यानाम् अवसराणां च लाभाय प्रेरिताः। राजकीय-अभियन्त्रण-महाविद्यालयस्य प्राचार्याः प्रो. राणाप्रतापसिंहमहोदयाः छात्रान् सम्बोध्य अकथयन् यत् युवानः स्वकीयां सर्जनात्मकां मेधां नूतनोद्भावनञ्च व्यावसायिक-अवसरेषु परिवर्त्तयन्तु। कार्यक्रमान्ते नवोद्यम-प्रकोष्ठस्य संकाय-प्रभारिभिः प्रो. शशाङ्कसौरभमहोदयैः हार्दं धन्यवादज्ञापनं कृतम्। उल्लेखनीयमस्ति यत् 'बिहार-विचार-महोत्सवे' मधुबनी-जनपदात् १,१९५ अभिनव-विचाराणां सम्प्राप्तिः मण्डलस्य युवानां प्रखरप्रतिभां सूचयति। नवोद्यम-प्रकोष्ठः एतान् सर्वान् विचारान् व्यावहारिकव्यापारेण, विपण्या, रोजगारसृजनेन च संयोजयितुं कटिबद्धः अस्ति।

"नवोद्यमस्य आरम्भः प्रथमं सोपानम्; तं शाश्वतं, विपणि-योग्यं, सुविस्तारयोग्यञ्च व्यापारं विधातुं महती चुनौती श्रेष्ठश्चावसरो वर्तते।" राजकीय-अभियन्त्रण-महाविद्यालयस्य नवोद्यम-प्रकोष्ठस्य तथा जिला-उद्योग-केन्द्रस्य समन्वितप्रयासानां मूलध्येयं जनपदे नवान्वेषणं, विपणि-प्रवेशम्, उद्यमितां, विपुलरोजगारसृजनञ्च संवर्ध्य एकां सुस्थिरां नवोद्यम-व्यवस्थां प्रतिष्ठापयितुम् अस्ति।

# प्रशान्तकिशोरस्य दशसहस्र-आजीविका-प्रदानस्य प्रतिज्ञायाः अनन्तरं स्ववृत्तपत्रं (सीवी) गृहीत्वा दलकार्यालयं प्राप्नुवन्ति बाँकीपुरस्य जनाः, स्थानीयसमस्यानां विषयेऽपि कुर्वन्ति विचारविमर्शम्



**पाटलिपुत्रम्, हिमसंस्कृतवार्ता, राघवनाथझा,**
जन-सुराज-अभियानस्य सूत्रधारः प्रशान्तकिशोरः बाँकीपुर-विधानसभाक्षेत्रात् विधायकत्वेन निर्वाचितः सन् क्षेत्रे दशसहस्रं (१०,०००) वृत्ति-अवसरान् (रोजगारम्) उपपादयितुं सङ्कल्पं कृतवान्। अस्याः प्रतिज्ञायाः अनन्तरं स्थानीयजनेषु वृत्तिं प्रति महान् उत्साहः परिलक्ष्यते। बाँकीपुरस्य स्थानीयाः नागरिकाः स्ववृत्तपत्रं (Curriculum Vitae / CV) स्वीकृत्य जन-सुराज-दलस्य कार्यालयम् आगच्छन्ति, वृत्ति-सम्बन्धि-अवसरेभ्यः विविधां सूचनां च गृह्णन्ति। दलकार्यालये प्रतिदिनं प्रायः चत्वारिंशतः पञ्चाशत् (४०–५०) पर्यन्तं जनाः समागच्छन्ति। एतेषु अधिकांशाः युवानः वर्तन्ते, ये स्ववृत्तपत्रं समर्पयितुं सहैव क्षेत्रस्य आजीविका-विकास-विषयेषु दलस्य नेतृभिः कार्यकर्तृभिश्च सह संवादं कुर्वन्ति।

अपरञ्च, वृत्तेः अतिरिक्तं बाँकीपुरस्य स्थानीयाः जनाः मार्ग-जलप्लावन-स्वच्छता-यातायात-जलनिर्गमनादीनाम् अन्यासां च स्थानीयसमस्यानां विषयेऽपि दलकार्यालयं प्राप्नुवन्ति। जनाः स्वाः कठिनाईः सूचयन्ति, तासां च समाधानाय विमर्शं कुर्वन्ति। स्थानीयजनानां कथनम् अस्ति यत् जीविकोपार्जनस्य अवसरैः सह क्षेत्रस्य मूलभूतानां समस्यानां निराकरणम् अपि नितराम् आवश्यकम् अस्ति। दलकार्यालयं प्राप्तानां नागरिकाणां समस्याः परामर्शश्च पञ्जीक्रियन्ते, येन ताः समुचिते स्तरे उपस्थापयितुं शक्येरन्। वृत्ति-स्थानिकसमस्यासु जनानाम् एषा वर्धमाना सहभागिता एतत् स्पष्टीकरोति यत् बाँकीपुरस्य नागरिकाः स्वक्षेत्रस्य भविष्यं प्रति अत्यन्तं सजगाः सन्ति।
उल्लेखनीयं यत्, पदशपथग्रहणानन्तरं प्रशान्तकिशोरः सर्वेषु मण्डलेषु (वार्ड-क्षेत्रेषु) 'जन-आभार-कार्यक्रमस्य' माध्यमेन स्थानीयनागरिकाणां मध्यं गत्वा तैः सह संवादम् अकरोत्, स्वयमेव च तेषां समस्याः अशृणोत्। तदनन्तरं पाटलिपुत्रे बाँकीपुरे च प्रवर्धमानस्य यातायात-सङ्कटस्य, मादकद्रव्य-दुर्व्यसनस्य (सूखा नशा), अवैध-धन-वसूली-प्रवृत्तेश्च समूलनाशाय सः आरक्षी-महानिदेशकैः (DGP) सह साक्षात् विचारविमर्शम् अकरोत्।

# भटसिमर-ग्रामे कलाकार-पञ्जीकरण-शिबिरस्य आयोजनम्






**मधुबनी हिमसंस्कृतवार्ता, राघवनाथझा**
राजनगर-प्रखण्डस्य भटसिमर-ग्रामे कलाकार-पञ्जीकरण-शिबिरं समायोजिम्। एतत् शिबिरं बिहारस्य प्रसिद्ध-लोककलाकारस्य तथा सङ्गीत-नाटक-अकादमी-पुरस्कार-(२०२४)-भाजनस्य श्रीमहेंद्राममहोदयस्य ग्रामे विहितम्। शिबिरप्रसङ्गे रोशनचौकी तथा सखी-बहिनपा सहितानां विविधानां लोककलाविधानां कलाकाराः समुपस्थिताः बिहार-कलाकार-पञ्जीकरण-पोर्टल-विषये तथा कलाकार-वृत्तिका-(पेंशन)-योजना-सम्बन्धे विस्तरेण अवबोधिताः। कलाकाराणां कृते पञ्जीकरणप्रक्रिया, आवश्यकाभिलेख-विवरणं, कलाप्रदर्शनाधारितप्रमाणपत्राणां, छायाचित्राणां (Photos), दृश्यश्राव्यपटलानां च (Videos) आरोपणप्रक्रिया (Upload), सहैव च कलाकार-पेंशन-योजनायाः पात्रता-आवेदनविधीनां सम्यक् ज्ञानं प्रदत्तम्। अस्मिन् अवसरे सर्वेभ्यः कलाविद्भ्यः आवाहनं कृतं यत् ते स्वकलायाः प्रतिभायाश्च सर्वकारस्तरे समुचितपरिचयाय विविधेभ्यः अवसरेभ्यश्च बिहार-कलाकार-पञ्जीकरण-पोर्टले स्वपञ्जीकरणम् अवश्यं कारयेयुः। सहैव, योग्याः कलाकाराः कलाकार-पेंशन-योजनायाः लाभं प्राप्तुम् आवेदनं कुर्युः इत्यपि निवेदितम्। जिला-कला-संस्कृति-कार्यालयः, मधुबनी इत्यनेन ज्ञापितं यत् कलाकार-पञ्जीकरणाय अथवा कलाकार-पेंशन-योजनायै कस्यापि विवरणस्य कृते जिला-कला-संस्कृति-कार्यालयस्य साहाय्यदूरभाषसङ्ख्यायां (Helpline) ९९३१७४७७९६ इत्यत्र सम्पर्कः कर्तुं शक्यते। एतदतिरिक्तं यदि कस्मिंश्चित् ग्रामे बहुसङ्ख्याकाः कलाकाराः विद्यन्ते तथा तत्र शिबिरायोजनस्यावश्यकता वर्तते, तर्हि सम्बद्धाः कलाकाराः ग्रामीणाश्च पूर्वोक्त-दूरभाषसङ्ख्यायां सम्पर्कं कृत्वा शिबिरायोजनाय सूचनां दातुं शक्नुवन्ति। "स्वकीयायै कलायै दीयतां परिचयः, बिहारसर्वकारेण सह वर्ध्यतां सम्मानः अवसराश्च।"

# भागलपुरस्थ-ऐतिहासिक-'श्री श्री गौशालायाः स्थलीयनिरीक्षणं कृतवान् बिहार-पशुपालननिदेशकः



## प्रशंसिता गौशालायाः सुदृढ-व्यवस्था; राज्यसर्वकारस्तरात् वित्तीय-प्राविधिक-सहयोगस्य दृढं प्रतिश्रुतम्

**पाटलिपुत्रम्, हिमसंस्कृतवार्ता, राघवनाथझा,**
बिहारसर्वकारस्य पशुपालननिदेशालयस्य (पटना) शीर्षनिदेशकैः श्रीउज्ज्वलकुमारसिंहमहोदयैः (भा.प्र.से.) भागलपुरस्थितायाः गौरवशालिन्याः 'श्री श्री गौशाला'याः सघनं स्थलीयनिरीक्षणं विहितम्। अस्मिन् महत्त्वपूर्णे अवसरे तैः साकं सदर-अनुमण्डलाधिकारी (भागलपुरम्), जिलापशुपालनाधिकारी (भागलपुरम्), गौशालासङ्घटनस्य मानदसचिवः, अन्ये च गण्याः सदस्याः प्रशासनिकपदाधिकारिणश्च समुपस्थिताः आसन्।
निरीक्षणप्रक्रमे निदेशकैः गौशालायां सम्यक् संवर्धितानां गोवंशानां समुचितपरिचर्यायाः, उच्चस्तरीयस्वच्छतायाः, आहार-जलादिसुविधानां तथा च पशूनां स्वास्थ्यसुरक्षाप्रबन्धनस्य सूक्ष्मं परीक्षणं सम्पादितम्। संस्थायाः आदर्शव्यवस्थां सर्वाङ्गीणप्रबन्धनं च अवलोक्य तैः भृशं सन्तोषः प्राकाश्यत, प्रबन्धनसमित्याः निष्ठापूर्णाः प्रयासाश्च भूयसा अभिनन्दिताः।
गौशालायाः व्यापकसंवर्धनाय, आधुनिकीकरणाय, उत्तरोत्तर-प्रगतये च राज्यसर्वकारस्य पक्षतः सर्वविधा वित्तीयसहायता प्राविधिकमार्गदर्शनं च दातुं तैः दृढम् आश्वासनं प्रदत्तम्।

**रविः खरिडेहालः - बेङ्गलूरु।**

# " भ्रमणदूर्वाणीयन्त्र-उत्पादनं वर्धयितुं योजना

भ्रमणदूर्वाणीयन्त्र-उत्पादन-वर्धनाय कृते सर्वकारेण ६२५०० कोटिरूप्यकाणां मार्गदर्शिकाः प्रसुताः । अस्य उद्देश्यं गार्ह्य-उत्पादनं वर्धयितुं वर्तते पिएलअइ-योजना अन्तरगतम् अस्ति च । योजनायाः अन्तर्गतं वित्तीयवर्षे २०२५-२६ मध्ये १०००० कोटिरूप्यकाणां व्यापारस्य विद्यमानाः वैद्युतकशास्त्र-अनुबन्धनिर्मातारः सहितं भ्रमणदूर्वाणीयन्त्र-निर्मातारः लाभाय पात्राः सन्ति । ५१% भारतीयस्वामित्वं, २०२५-२६ मध्ये १००० कोटिरूप्यकाणां व्यापारं च विद्यमानाः वैद्युतकशास्त्र-निर्माण-सेवा-संस्थाः अपि भागं गृह्णीयुः ।विद्यमान संस्थाः २०२५-२६ वर्षस्य विक्रय-आँकडानां अधिकं प्रतिवर्षं ५००० कोटिरूप्यकाणां न्यूनतम-विक्रयं प्राप्तुं अर्हन्ति ।






डॉ विमलेश झा, गंगौली, सरिसवपाही , मधुबनी , बिहार

# गृहे गृहे त्रिवर्णध्वज-कार्यक्रमस्य समीक्षा(पर्वविशेषः)

भारतदेशः विविधतायाः देशः अस्ति। अत्र विभिन्नाः भाषाः, वेशभूषाः, परम्पराः, सम्प्रदायाः, जीवनपद्धतयः च सन्ति; तथापि सर्वेषां भारतीयानां हृदयेषु राष्ट्रभावनायाः महत्त्वं समानं दृश्यते। राष्ट्रस्य एकतायै, अखण्डतायै, स्वतन्त्रतायै च राष्ट्रध्वजस्य अत्यन्तं महत्त्वपूर्णं स्थानम् अस्ति। भारतस्य राष्ट्रध्वजःन केवलं वस्त्रखण्डः , अपितु असंख्यवीराणां त्यागस्य, संघर्षस्य, स्वतन्त्रतायाः राष्ट्रियैकतायाः च सजीवप्रतीकः अस्ति।

भारतस्य राष्ट्रध्वजः त्रिवर्णमयः अस्ति। अतः सामान्यरूपेण एषः 'त्रिवर्णध्वजः' इति कथ्यते। ध्वजस्य केसरवर्णः त्यागस्य, साहसस्य च प्रतीकः; श्वेतवर्णः सत्यस्य, शान्तेः, पवित्रतायाः च द्योतकः; हरितवर्णः समृद्धेः, विकासस्य, प्रकृतेः च प्रतीकः वर्तते। मध्ये नीलवर्णयुक्तं अशोकचक्रं धर्मस्य, सततगतिशीलतायाः, कर्मशीलतायाः च संदेशं ददाति। 'गृहे गृहे त्रिवर्णध्वजः' इति कार्यक्रमस्य मूलभावना अस्ति यत् राष्ट्रध्वजः केवलं राजकीयभवनानां वा सार्वजनिकस्थानानां शोभां न वर्धयेत्, अपितु प्रत्येकस्य भारतीयस्य गृहे राष्ट्रगौरवस्य प्रतीकरूपेण प्रतिष्ठितः भवेत्। अस्य कार्यक्रमस्य माध्यमेन नागरिकेषु राष्ट्रप्रेम, राष्ट्रियैकता, कर्तव्यबोधः, स्वाभिमानः च जागरितुं शक्यते। भारतीयस्य राष्ट्रध्वजस्य वर्तमानस्वरूपस्य निर्माणे दीर्घः ऐतिहासिकः संघर्षः निहितः अस्ति। स्वातन्त्र्यसंग्रामकाले राष्ट्रस्य एकतां जनानां मनसि जागरयितुं ध्वजस्य विशेषं महत्त्वम् आसीत्। अनेके राष्ट्रभक्ताः स्वदेशस्य स्वाधीनतायै प्राणान् अर्पितवन्तः। तेषां संघर्षस्य स्मरणं राष्ट्रध्वजं दृष्ट्वा भवति। स्वतन्त्रताप्राप्तेः अनन्तरं भारतस्य संविधानसभया राष्ट्रध्वजस्य वर्तमानस्वरूपं स्वीकृतम्। अस्मिन् ध्वजे त्रयः समानपरिमाणाः वर्णाः सन्ति—उपरि केसरः, मध्ये श्वेतः, अधः हरितः। श्वेतपट्टिकायाः मध्ये नीलवर्णीयम् अशोकचक्रं विराजते। अशोकचक्रे चतुर्विंशतिः अराः सन्ति। एतत् चक्रं निरन्तरं गतिशीलतां धर्मं च सूचयति।

अतः राष्ट्रध्वजस्य सम्मानं वस्तुतः भारतस्य इतिहासस्य, संविधानस्य, स्वातन्त्र्यसंग्रामस्य तथा राष्ट्रनायकेषु निहितानां आदर्शानां सम्मानः अस्ति। गृहे गृहे त्रिवर्णध्वजस्य स्थापनायाःमुख्योद्देश्यं राष्ट्रध्वजं जनजीवनस्य अभिन्नं भागं कर्तुम् अस्ति। यदा प्रत्येकं परिवारं स्वगृहे राष्ट्रध्वजं सम्मानपूर्वकं स्थापयति, तदा राष्ट्रप्रेम केवलं भाषणेषु, विद्यालयीयकार्यक्रमेषु अथवा सार्वजनिकसमारोहेषु सीमितः न भवति, अपितु पारिवारिकजीवनस्य अङ्गं भवति। गृहं समाजस्य मूलघटकम् अस्ति। बालकः प्रथमां शिक्षां स्वपरिवारात् एव प्राप्नोति। यदि गृहे राष्ट्रध्वजस्य महत्त्वं, राष्ट्रस्य संविधानस्य महत्त्वं, स्वातन्त्र्यवीराणां त्यागस्य महत्त्वं च बालकः जानाति, तर्हि तस्य मनसि बाल्यकालादेव राष्ट्रनिष्ठा विकसितुं शक्नोति। अतः 'गृहे गृहे त्रिवर्णध्वजः' कार्यक्रमः केवलं ध्वजस्थापनस्य कार्यक्रमः न, अपितु राष्ट्रचेतनायाः जनान्दोलनरूपेण विकसितुं शक्यमानः एकः महत्त्वपूर्णः सामाजिकप्रयासः अस्ति।

अस्य कार्यक्रमस्य अनेकानि उद्देश्यानि सन्ति। प्रथमम् उद्देशम् राष्ट्रप्रेम्णः जागरणम् अस्ति। नागरिकाः स्वदेशस्य गौरवं, इतिहासं, संस्कृतिं, संविधानं च जानीयुः, तेषु राष्ट्रनिष्ठा च वर्धेत इति कार्यक्रमस्य प्रमुखः हेतुः।

द्वितीयम् उद्देश्यं राष्ट्रियैकतायाः सुदृढीकरणम् अस्ति। भारतस्य विविधतायां एकतां प्रदर्शयितुं राष्ट्रध्वजः समर्थः प्रतीकः अस्ति। विभिन्नभाषाभाषिणः, विभिन्नप्रदेशेषु निवसन्तः, विभिन्नपरम्पराणां अनुयायिनः च एकस्य राष्ट्रध्वजस्य अधः एकतां अनुभवन्ति।

तृतीयम् उद्देश्यं नवयुवकेषु राष्ट्रकर्तव्यबोधस्य विकासः अस्ति। राष्ट्रप्रेम केवलं ध्वजं धृत्वा वा राष्ट्रगीतं गात्वा समाप्तः न भवति। देशस्य नियमपालनम्, पर्यावरणसंरक्षणम्, सार्वजनिकसम्पत्तेः रक्षणम्, करदानम्, मतदानम्, दुर्बलानां सहाय्यम्, समाजसेवा च वास्तविकराष्ट्रभक्तेः स्वरूपाणि सन्ति। चतुर्थम् उद्देश्यं स्वतन्त्रतासेनानीनां स्मरणम् अस्ति। राष्ट्रध्वजं दृष्ट्वा नागरिकाः तेषां बलिदानं स्मरन्ति येषां कारणेन भारतं स्वतन्त्रं जातम्।

भारतं विशालं राष्ट्रम् अस्ति। हिमालयात् आरभ्य कन्याकुमारीपर्यन्तं, गुजरातप्रदेशात् आरभ्य अरुणाचलप्रदेशपर्यन्तं विविधाः भौगोलिकाः, भाषिकाः, सांस्कृतिकाः च विशेषताः दृश्यन्ते। तथापि भारतस्य राष्ट्रध्वजः सर्वेषां नागरिकानां समानः अस्ति। यदा ग्रामे, नगरे, पर्वते, समुद्रतटे वा गृहे गृहे त्रिवर्णध्वजः दृश्यते, तदा सर्वेषां मनसि एकस्य राष्ट्रस्य भावः दृढतरः भवति। ध्वजः अस्मान् स्मारयति यत् अस्माकं व्यक्तिगताः परिचयाः भिन्नाः भवितुम् अर्हन्ति, किन्तु राष्ट्रीयपरिचयः एकः एव—वयं भारतीयाः स्मः।

अतः त्रिवर्णध्वजः राष्ट्रीयसमन्वयस्य सशक्तं माध्यमम् अस्ति। गृहे गृहे त्रिवर्णध्वजकार्यक्रमस्य सफलतायै परिवारस्य भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति। बालकाः यत् पश्यन्ति, तत् शीघ्रं कर्तुम् इच्छन्ति। अतः माता-पितरौ यदि राष्ट्रध्वजस्य सम्मानपूर्वकं स्थापनां कुरुतः, तस्य महत्त्वं बालकान् कथयतः, स्वतन्त्रतासेनानीनां जीवनकथाः श्रावयतः च, तर्हि बालकानां मनसि राष्ट्रभावना स्वाभाविकरूपेण आगचशछति। परिवारः बालकान् एतदपि शिक्षयितुं शक्नोति यत् राष्ट्रध्वजस्य सम्मानं केवलं ध्वजारोहणसमये न करणीयम्, अपितु सर्वदा सर्वत्र करणीयम्। ध्वजस्य मर्यादा, स्वच्छता, उचितस्थापनम्, सम्मानपूर्वकं अवतारणम् इत्यादयः विषयाः अपि शिक्षणीयाः। विद्यालयः राष्ट्रनिर्माणस्य प्रमुखं केन्द्रम् अस्ति। विद्यालयेषु 'गृहे गृहे त्रिवर्णध्वजः' इत्यस्य भावनां सुदृढीकर्तुं विविधाः कार्यक्रमाः आयोजयितुं शक्यन्ते।छात्रैः राष्ट्रध्वजस्य इतिहासविषये भाषणानि, निबन्धलेखनम्, चित्रनिर्माणम्, प्रश्नोत्तरी, वादविवादः, गीतानि, संस्कृतश्लोकपाठः, नाटिकाः च आयोजयितुं शक्यन्ते। छात्राः स्वपरिवारस्य सदस्यैः सह राष्ट्रध्वजस्य महत्ताविषये चर्चां कर्तुं शक्नुवन्ति। विद्यालये राष्ट्रध्वजस्य त्रयाणां वर्णानां प्रतीकात्मकं महत्त्वं स्पष्टतया बोधयितुं शक्यते। विशेषतः बालकानां मनसि एषः भावः स्थापनीयः यत् राष्ट्र स्नेहः केवलं उत्सवविशेषस्य विषयः न, अपितु प्रतिदिनस्य आचरणस्य विषयः अस्ति। भारतं युवाशक्तिप्रधानं राष्ट्रम् अस्ति। अतः युवानः राष्ट्रनिर्माणस्य मुख्यशक्तयः सन्ति। 'गृहे गृहे त्रिवर्णध्वजः' कार्यक्रमे युवानां सक्रियसहभागिता अत्यन्तं लाभदायिका भवितुम् अर्हति। युवकाः स्वगृहे ध्वजस्थापनं कृत्वा तस्य छायाचित्रं सामाजिकमाध्यमेषु प्रकाशितुं शक्नुवन्ति। किन्तु सामाजिकमाध्यमेषु प्रकाशनस्य उद्देश्यं केवलं प्रदर्शनं न भवेत्। तस्य माध्यमेन राष्ट्रध्वजस्य इतिहासः, स्वातन्त्र्यवीराणां जीवनम्, संविधानस्य मूल्यानि, नागरिककर्तव्यं च जनसामान्येभ्यः बोधयितुं शक्यते। युवानः स्वच्छताभियानम्, वृक्षारोपणम्, रक्तदानम्, निर्धनसहायता, ग्रामसेवा, पर्यावरणसंरक्षणम् इत्यादिषु कार्येषु भागं गृहीत्वा राष्ट्रप्रेम्णः वास्तविकं स्वरूपं प्रदर्शयितुं शक्नुवन्ति। भारतीयपरिवारव्यवस्थायां महिलानां भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति। मातरः बालकानां संस्कारनिर्माणे प्रमुखां भूमिकां वहन्ति। अतः मातृशक्तेः सहभागितया राष्ट्रभावनायाः प्रसारः अधिकः प्रभावकारी भवितुम् अर्हति। माता बालकान् स्वातन्त्रतासंग्रामस्य कथाः कथयितुं शक्नोति। राष्ट्रध्वजस्य सम्मानं, देशस्य संविधानस्य महत्त्वं, सामाजिकसमरसतायाः आवश्यकता च बालकेषु राष्ट्रभक्तिभावनायाः जागरणं कारयति। एवं च परिवारात् राष्ट्रप्रेम्णः संस्कारः समाजं प्रति आगच्छति। भारतीयसमाजे विविधाः सामाजिकसमुदायाः सन्ति। कदाचित् भाषा, जातिः, प्रदेशः, आर्थिकस्थितिः वा अन्यानि कारणानि सामाजिकभेदं जनयन्ति।

यदि निर्धनस्य गृहे अपि, धनिकस्य गृहे अपि, ग्रामे अपि, नगरे अपि, छात्रस्य गृहे अपि, श्रमिकस्य गृहे अपि त्रिवर्णध्वजः समानसम्मानेन प्रतिष्ठाप्यते, तर्हि सामाजिकसमतायाः भावः सुदृढः भवति।

अतः कार्यक्रमः सामाजिकसमरसतायाः अपि प्रभावी साधनं भवितुम् अर्हति।

## त्रिवर्णध्वजस्य प्रत्येकं वर्णं विशेषं सन्देशं वहति।

केसरवर्णः त्यागस्य, साहसस्य, निःस्वार्थसेवायाः च प्रेरणां ददाति। राष्ट्रहिताय स्वार्थत्यागः करणीयःइति अस्य भावः। श्वेतवर्णः सत्यस्य, शान्तेः, पवित्रतायाः च प्रतीकः अस्ति। नागरिकैः सत्यं सर्वदा वक्तव्यम्, शान्तिपूर्णं जीवनं जीवितव्यम्, समाजे सौहार्दं स्थापनीयम् इति श्वेतवर्णः प्रेरयति।हरितवर्णः प्रकृतेः, विकासस्य, समृद्धेः च प्रतीकः अस्ति। राष्ट्रस्य आर्थिकविकासेन सह पर्यावरणस्य संरक्षणमपि आवश्यकम् अस्ति। अतः हरितवर्णः मानवस्य प्रकृत्या सह सामञ्जस्यपूर्णजीवनस्य सन्देशं ददाति। अशोकचक्रं निरन्तरगतिशीलतायाः प्रतीकम् अस्ति। जीवनं, समाजः, राष्ट्रं च निरन्तरं प्रगतिपथे गच्छेत् इति तस्य प्रेरणा अस्ति। राष्ट्रध्वजस्य स्थापना राष्ट्रप्रेम्णः सुन्दरं प्रतीकम् अस्ति, किन्तु राष्ट्रप्रेम तत्रैव समाप्तः न भवेत्। यदि कोऽपि नागरिकः स्वगृहे ध्वजं स्थापयित्वा सार्वजनिकस्थानं मलिनं करोति, नियमभंगं वा , भ्रष्टाचारं करोति, पर्यावरणं नाशयति वा सार्वजनिकसम्पत्तिं विनाशयति, तर्हि तस्य ध्वजप्रेम अपूर्णः एव। राष्ट्रप्रेम नागरिककर्तव्यपालनेन एव प्रकटते। राष्ट्रस्य संविधानस्य सम्मानं, विधेः पालनम्, करदानम्, मतदानम्, पर्यावरणसंरक्षणम्, स्त्रीसम्मानम्, वृद्धसेवा, बालरक्षा, निर्धनसहायता, सार्वजनिकसम्पत्तेः संरक्षणम् एतानि सर्वाणि राष्ट्रसेवायाः रूपाणि सन्ति। अतः 'गृहे गृहे त्रिवर्णध्वजः' कार्यक्रमस्य मूलसन्देशः भवेत्—'गृहे ध्वजः, हृदये राष्ट्रम्, आचरणे कर्तव्यम्।' कार्यक्रमस्य एकः महत्त्वपूर्णः पक्षः पर्यावरणसंरक्षणम् अपि अस्ति। राष्ट्रध्वजस्य निर्माणे प्रयुक्तस्य पदार्थस्य चयनं सावधानतया करणीयम्। एकवारप्रयोगयोग्याः प्लास्टिकध्वजाः कार्यक्रमस्य पश्चात् यत्र तत्र पतिताः दृश्यन्ते चेत्, तर्हि राष्ट्रध्वजस्य गौरवस्य हानिः भवति तथा पर्यावरणस्य अपि क्षतिः भवति।

अतः नागरिकैः ध्वजस्य सम्मानपूर्वकं उपयोगः करणीयः। कार्यक्रमस्य समाप्तेः अनन्तरं ध्वजस्य उचितरीत्या संरक्षणं वा विसर्जनं वा करणीयम्।

क्रमशः..अग्रिमे पृष्ठे

# हर-घर-तिरंगा...

बालकेभ्यः अपि एतस्य विषयस्य शिक्षा दातव्या।
अद्यतनयुगे सामाजिकमाध्यमानि जनजागरणस्य प्रभावी साधनानि सन्ति। गृहे गृहे त्रिवर्णध्वजस्य कार्यक्रमस्य माध्यमेन लक्षशःजनाः परस्परं प्रेरितुं शक्नुवन्ति। सामाजिकमाध्यमेषु ध्वजस्य चित्रं प्रकाशितं कृत्वा 'राष्ट्रप्रेम' इति भावस्य प्रसारः भवितुं शक्नोति। तथापि अस्मिन् विषये संयमः आवश्यकः वर्तते। राष्ट्रध्वजस्य छायाचित्रं केवलं लोकप्रियताप्राप्तये वा व्यक्तिगतप्रचाराय वा प्रयुक्तं न भवेत्। सामाजिकमाध्यमं जनशिक्षणस्य साधनं भवेत्।'गृहे गृहे त्रिवर्णध्वजः' कार्यक्रमस्य अनेके सकारात्मकाः परिणामाः भविष्यन्ति।
प्रथमः, राष्ट्रध्वजस्य प्रति सम्मानभावना वर्धते।
द्वितीयः, बालकेषु तथा युवकेषु राष्ट्रप्रेम्णः संस्कारः आगच्छति।तृतीयः, विभिन्नसमुदायानां मध्ये राष्ट्रियैकता सुदृढा भवितुम् अर्हति।
चतुर्थः, स्वातन्त्रतासंग्रामस्य इतिहासं ज्ञातुं जनाः प्रेरिताः भवन्ति।पञ्चमः संविधानस्य नागरिककर्तव्यस्य च विषये जनजागरणं भवति।
षष्ठः, परिवारः राष्ट्रनिर्माणस्य प्रक्रियायां प्रत्यक्षतया सहभागी भवति। सप्तमः, राष्ट्रध्वजः केवलं राजकीयसमारोहस्य प्रतीकत्वात् निर्गत्य जनजीवनस्य भावनात्मकप्रतीकत्वं प्राप्नोति।
यद्यपि कार्यक्रमः अत्यन्तं प्रेरणादायकः अस्ति, तथापि तस्य आयोजनसमये केचन दोषाः अपि सम्भवन्ति। प्रथमः, कार्यक्रमः केवलं औपचारिकः न भवेत्। ध्वजस्थापनं कृत्वा ततः राष्ट्रकर्तव्यं विस्मरणीयं नास्ति।द्वितीयः राष्ट्रध्वजस्य अनुचितप्रयोगः न करणीयः। ध्वजः वस्त्ररूपेण, भूमौ पादपीठरूपेण, अपवित्रस्थाने वा प्रयुक्तः न भवेत्। तृतीयः, प्लास्टिकनिर्मितानां अल्पजीविनां ध्वजानां अनियन्त्रितप्रयोगः पर्यावरणाय हानिकारकः भवितुम् अर्हति।
चतुर्थः कार्यक्रमः राजनीतिकविभाजनस्य साधनं न भवेत्। राष्ट्रध्वजः सर्वेषां भारतीयानां सम्मानम् अस्ति। पञ्चमः केवलं सामाजिकमाध्यमेषु छायाचित्रप्रकाशनं राष्ट्रप्रेम्णः प्रमाणं न मन्येत। वास्तविकं राष्ट्रप्रेम आचरणे दृश्यते।कार्यक्रमस्य प्रभावं वर्धयितुं निम्नलिखिताः उपायाः स्वीकरणीयाः।
1. प्रथमः प्रत्येकं विद्यालये राष्ट्रध्वजस्य इतिहासस्य विशेषकक्षा आयोजनीया।
2. द्वितीयः बालकेभ्यः स्वतन्त्रतासेनानीनां जीवनचरितं कथारूपेण बोधनीयम्।
3. तृतीयः प्रत्येकं परिवारः ध्वजस्थापनेन सह एकं नागरिककर्तव्यं स्वीकुर्यात्।
4. चतुर्थः 'एकं गृहं, एकं राष्ट्रकार्यं' इति भावनया वृक्षारोपणम्, स्वच्छता, जलसंरक्षणम्, विद्युत्संरक्षणम् इत्यादयः कार्यक्रमाः आयोजनीयाः।
5. पञ्चमः ग्रामेषु तथा नगरेषु जनजागरणयात्राः आयोजनीयाः।
6. षष्ठमः संस्कृत, हिन्दी तथा अन्यभारतीयभाषासु राष्ट्रभावनापरकाः कार्यक्रमाः आयोजनीयाः।
7. सप्तमः राष्ट्रध्वजस्य मर्यादायाः विषये जनसामान्यं शिक्षणीयम्।
8. अष्टमः कार्यक्रमस्य अन्ते नागरिकैः राष्ट्रसेवायाः व्यक्तिगतसंकल्पः करणीयः।
कार्यक्रमस्य सर्वाधिकः महत्त्वपूर्णः पक्षः नैतिकसंकल्पः अस्ति। प्रत्येकं परिवारं यदि ध्वजस्थापनसमये निम्नलिखितं संकल्पं कुर्यात्, तर्हि कार्यक्रमस्य प्रभावः स्थायी भवितुम् अर्हति—
'वयं भारतस्य संविधानस्य सम्मानं करिष्यामः। राष्ट्रस्य एकताम् अखण्डतां च रक्षिष्यामः। पर्यावरणस्य संरक्षणं करिष्यामः। सार्वजनिकसम्पत्तेः रक्षणं करिष्यामः। सत्यं वदिष्यामः। नियमपालनं करिष्यामः। दुर्बलानां साहाय्यं करिष्यामः। देशस्य प्रगतौ स्वशक्त्यानुसारं योगदानं दास्यामः।'
एवं च ध्वजः केवलं गृहे न स्थाप्यते, अपितु नागरिकस्य हृदये अपि प्रतिष्ठाप्यते।समग्रदृष्ट्या वयं वक्तुं शक्नुमो यत् 'गृहे गृहे त्रिवर्णध्वजः' कार्यक्रमः राष्ट्रभावनायाः जागरणाय अत्यन्तम् उपयोगी अभियानं भवितुम् अर्हति। अत्र यदि अल्पसंख्यकाः परिवाराः अपि ध्वजस्थापनेन सह सत्यनिष्ठां, स्वच्छतां, पर्यावरणरक्षणं, सामाजिकसेवां, संविधानसम्मानं च स्वीकुर्वन्ति, तर्हि कार्यक्रमः वास्तवमेव सफलः इति वक्तुं शक्नुमः। अतः कार्यक्रमस्य सफलता 'कति गृहेषु ध्वजः स्थापितः' इत्यनेन न, अपितु 'कति हृदयेषु राष्ट्रभावना जागृता' इत्यनेन निर्धारणीया। अतः सर्वे भारतीयाः मिलित्वा एतं संकल्पं कुर्वन्तु यत् "गृहे गृहे त्रिवर्णध्वजः, हृदये हृदये राष्ट्रभावना, आचरणे आचरणे राष्ट्रसेवा।"यदा एषा भावना प्रत्येकं भारतीयहृदये जागृता भविष्यति, तदा भारतस्य एकता, अखण्डता, समृद्धिः, गौरवं च निश्चयेन अधिकं सुदृढं भविष्यति। त्रिवर्णध्वजः अस्मान् केवलं अतीतस्य स्मरणं न कारयतु, अपितु विकसितभारतस्य निर्माणाय प्रेरयतु एष एव अस्य कार्यक्रमस्य सन्देशः विद्यते।अन्ते च-"यत् त्रिरङ्गं ध्वजं विदधत् वर्षमार्षं विजयते। सार्वभौमं लोकतन्त्रं धर्मराष्ट्रं गीयते।"

✍डॉ.विमलेशझा



# संस्कृतं सुसंस्कृतं नमामि

प्रणौमि विद्याभारतीं नु मातरं मे सारथिम्
दिव्यपूर्णभास्वतीं सदैव सारशाश्वतीम् ।१।
(समूहगानम्-)
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम्
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम् ।।
सम्यक् साधु शोभनं सदैव शान्तिसाधनम्
रामराज्यकारणं वैरिवैरवारणम्
परमतृप्तितारणं गीताज्ञानधारणम्
प्रेरणातिप्रेरणं च भक्तिभावभावनम् ।२।
(समूहगानम् -)
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम्
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम् ।।
भवने भवने भूषितं गगने पवने ध्वनितम्
वदने वदने स्वनितं सदैव आ विभासितम्
सार्वभौमशोभितं च देवपूजनार्चितम्
दिव्यताविधायनं भव्यताया ज्ञापनम् ।३।
(समूहगानम् -)
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम्
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम् ।।
काव्यधाराधारणं वेदविद्याभारणम्
दुष्टमादमर्दनं रञ्जनं सुरञ्जनम्
सुकालकालपालितं रम्यरामनामितम्
सादरं समादरं सत्यसारसंस्कृतम् ।४।
(समूहगानम् -)
संस्कृतं सुसंस्कृतं नमामि ॐ सुसंस्कृतम्
नमामि ॐ सुसंस्कृतं नमामि ॐ सुसंस्कृतम्
नमामि ॐ सुसंस्कृतं नमामि ॐ सुसंस्कृतम्
नमामि ॐ सुसंस्कृतं नमामि ॐ सुसंस्कृतम् ।।

**रचयिता- आचार्यः डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

# संस्कृतं मधुरं सदा- ६५

## (दुःखालयम्)

गीतायां श्रीभगवान् अकथयत् -
"ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः।।"
इति।
अर्थात् इन्द्रिय-विषययोः संयोगेन उत्पन्नाः यावन्तः भोगाः सन्ति, ते सर्वेऽपि केवलं दुःखस्य हि कारणीभूताः, अनित्याः च सन्ति। अतः विवेकी मनुष्यः तेषु न रमते।
वस्तुतः गुणानां कार्यस्य नाम गुणवृत्तिः कथ्यते, तेषां कार्येषु परस्परं अत्यन्तं विरोधः वर्तते। यथा सत्त्वगुणस्य कार्यं प्रकाशः, ज्ञानं, सुखञ्च। तमोगुणस्य कार्यम् अन्धकारः, अज्ञानं, दुःखञ्च। तस्मात् अनयोः कार्ययोः मध्ये विरोधभावकारणतः मनसि द्विधा तिष्ठति, सुखभोगकालेऽपि शान्तिः न प्राप्यते, यतोहि गुणत्रयं हि सहैव मिश्रितरूपेण तिष्ठति। सुखस्य अनुभवकाले सत्त्वगुणस्य प्रधानता भवति चेदपि रजोगुण-तमोगुणयोः अभावः न भवति। अतः तस्मिन् कालेऽपि दुःख-शोकौ विद्यमानौ भवतः, तस्मात् मनुष्यः दुःखी हि तिष्ठति। यथा ध्यानकाले, सत्सङ्गकाले च सत्त्वगुणस्य प्रधानता भवति, तस्मात् क्षणिकं सात्त्विकं सुखमपि अनुभूयते। परन्तु तत्रापि सांसारिकी स्फुरणा, एवं तन्द्रादिकं बाधते।
तस्मात् परिणामदुःखं, तापदुःखं, संस्कारदुःखं तथा गुणवृत्तिविरोधात् जायमानं दुःखं विवेकी पुरुषः स्वविवेकेन अवगच्छति। तस्मात् कारणात् तस्य दृष्टौ सर्वः कर्मविपाकः दुःखरूपः हि भवति। अर्थात् साधारणः मनुष्यसमुदायः यान् भोगान् सुखप्रदान् मन्यते, ते हि भोगाः विवेकिनां दृष्टौ सदैव दुःखप्रदाः हि भासन्ते। अतः जगदिदं दुःखालयम्, अशाश्वतं चेति।

**हिमसंस्कृतवार्ता, नारदोपाध्यायः,**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य विचित्राः यन्त्रमानवानां वार्ताः मया आनीताः। चीनदेशे यन्त्रमानवानां क्रीडोत्सवे अभ्याससमये एकः धावन् यन्त्रमानवः भित्त्या सह घट्टितः। सः वेगेन आहत्य मध्ये द्विधा भग्नः।
**नन्दिनी-** अहो, महती दुर्घटना सञ्जाता! अन्या अपि एका यन्त्रमानवस्य वार्ता मया श्रुता। प्रदर्शनी-सभायाम् एकः यन्त्रमानवः दोषयुक्तः जातः। सः भूमौ पतितवान् अस्ति, बालवत् कोपम् अपि प्रदर्शितवान् अस्ति। अन्ते यन्त्रिभिः सः निगृहीतः।
**काव्या-** हा! हा! यन्त्रैः अपि बालकानां स्वभावः अनुकृतः। दक्षिणकोरिया-देशे तु कृत्रिमबुद्ध्या भविष्यवक्तॄणां व्यवसायः एव आक्रान्तः। जनाः सम्प्रति तन्त्रांशैः निजभविष्यं ज्ञातुम् इच्छन्ति। अतः परम्परागत-भविष्यवक्तारः जनैः त्यक्ताः सन्ति।
**नन्दिनी-** तत् तु अतीव चिन्ताजनकम्! भविष्यज्ञानमपि यन्त्रैः दत्तम्। अन्ते, एका रञ्जिका वार्ता मया प्रस्तूयते। चीनदेशे एव क्रीडोत्सवात् पूर्वम्, यन्त्रमानवैः पुरातनानि कौशेयवस्त्राणि धृतानि। तैः मनुष्यैः सह मिलित्वा वाद्यवृन्दे पटहवादनं कृतम्।
**काव्या-** अहो, यन्त्रमानवैः सङ्गीतम् अपि उत्पादितम्! विचित्रा एव एषा यन्त्राणां गतिः। शुभमस्तु।




# वृत्तिहीनता दुनोति
# रौमि देवि! चण्डिके!

साम्प्रतं तु शिक्षकस्य जीविकापि क्षीयते,
कालिकाग्रतो यतो पुनः पुनश्च भिक्ष्यते।
याचना पुरस्कृता त्वया कदा प्रपूर्यते?,
वृत्तिविघ्ननाशनं विधेहि देवि! कालिके!।।४६
वृत्तिलब्धिभावना सुभाषया प्रकाश्यते,
किंतु केन देवतेऽत्र तत्त्वया न श्रूयते?।
जीवनं वहामि किं क्व यामि वृत्तितृप्तये,
किञ्चिदेव गौरवं तु रक्ष देवि! कालिके!।।४७
साम्मनस्यमस्तु मत्कृते त्वदीयमानसे,
प्रार्थयामि याचनाः स्ववृत्तिलब्धये शिवे! ।
यामि विस्मयं सदैव भक्तभावभाविके,
भाव्यतां ममापि भावना च देवि! कालिके!।।४८
वृत्तियोजनं विधेहि ह्युच्चशिक्षणालये,
तद्विना मदाशयाः तुदन्ति मां हि कालिके!।
वृत्तितामुपैमि नूनमेव तादृशे स्थले,
कालिकाकृपाकणेन बुद्धिवैभवेन मे।।४९
वृत्तिहीनता दुनोति रौमि देवि! चण्डिके!,
पूर्णिमाप्यमातमोऽस्ति दासकस्य जीवने।
हर्षवर्षणं तमोवृतेऽत्र जीवनेऽस्तु मे,
भातु भक्तजीवनं कृपां कुरुष्व कालिके!।।५०
शिक्षितोऽपि योग्यवृत्तिहीनता गतोऽस्म्यहम्,
धीरतापि नश्यतीव भाति मां प्रतीक्षितुम्।
यत्नमाचरामि किं च विह्वलोऽस्मि कालिके!,
वृत्तियोजनं विधेहि देहलीपुराधिपे!।।५१
मन्यतेऽत्र देहलीपुरे च कालिकालये,
पूर्णकामनाः भवन्ति भक्तभावुकास्समे।
कालिके! शिवे! सहायिका भवेः विपत्क्षणे,
देहि वृत्तिसम्पदाञ्च देहलीपुराधिपे!।।५२
आपतन्ति सर्वतोऽपि सङ्कटानि मस्तके,
दुर्दशा समेधते न वक्तुमत्र शक्यते।
जीविकां विना मदीयहानिरेव जायते,
वृत्तिमेव यच्छ मेऽत्र दुर्गतिं निवारयेः।।५३
केन कारणेन वृत्तिसङ्कटे निपात्यते?,
वर्तते त्वदीेयमानसे किमत्र कालिके!।
कीदृशीह जीविका च मत्कृते प्रदास्यते,
देहि देयमस्ति चेत् पदं हि सर्वकारके।।५४
कोऽपि बालको विरौति मातुरत्र सम्मुखे,
सा विनैव लम्बनं प्रपश्यतीह वत्सके।
किं भविष्यतीति बालकस्य चापि चिन्त्यते,
योग्यजीविकां प्रदेहि देहलीपुराधिपे।।५५
देवि! भक्तिभावनाभिरत्र भावयाम्यहम्,
पुण्यवर्धनेन पापखण्डनं करोम्यहम्।
नामकीर्तनं त्वदीयमेव पादवन्दनम्,
देहलीपुराधिपे! कुरुष्व वृत्तिपूर्णताम्।।५६
माययैव ते जगत्तले निपातितोऽभवम्,
भात्यहो!जलोत्थबुद्बुदोऽस्मि नाशवानहम्।
सर्वकोविदासि कालिके! परे! सुतुष्टिदे!
स्वप्निकार्हजीविकां प्रयच्छ देवि! कालिके!।।५७
ह्युचशिक्षणालये सुशिक्षणस्य वृत्तये,
स्वप्नवृत्तिरस्ति मे चिरान्तनात् विचिन्तयेः।
धावनं तदर्थमेव कालिके! विधीयते,
देहि वृत्तितां सुशोभनां भजामि कालिके!।।५८
कालिकां जपामि कोटिशः पुनातु बालकं,
नौमि ते पदद्वयं हरत्वशेषकल्मषम्।
चोत्तमे पदे युनक्तु वृत्तिलिप्सुवत्सकम्,
तृप्तिदां सुजीविकां करोतु मह्यमर्पिताम्।।५९
पापिनेऽपि संश्रयं ददासि देवि! चण्डिके!,
नामजापकोऽस्म्यहं निवेदनं सुभावयेः।
योग्यवृत्तिकाङ्क्षिणं पदाश्रितं निभालयेः,
वृत्तिदानभावनादृशाऽधुना विलोकयेः।।६०
कोटि-कोटि-वन्दनां करोमि शास्त्र सम्मतां,
सर्वसौख्यदायिकेऽभियाचतेऽद्य वत्सकः।
वृत्ति-बुद्धिसिद्धिसाधिके! कृपाविधायिके!
नौमि पादयुग्मकं च देहलीपुराधिपे!।।६१
किं मदीयवन्दनार्चनां तथाभियाचनाम्,
दर्शनं सुपूजनं निवेदनां सुभावनाम्।
मन्त्रणां समर्पणां वृथा करोषि कालिके!,
जीविका कृतेऽद्य मन्मनोऽत्र चातकायते।।६२
देवदैत्यभक्तवृन्दसेविता सुकालिका,
पश्य सज्जनं च याचकं हि तेऽनुवर्तिनम्।
पूजया सुसेवया स्ववत्सके प्रसीद रे!
वृत्तिसिद्धये प्रणौमि देहलीपुराधिपे!।।६३
देहलीपुरस्य मुख्यतीर्थमस्ति भारते,
कालिकालयोऽत्र मित्र! नेहरुस्थले शुभे।
साधुसङ्गमस्सदा भवेच्च नामकीर्तने,
देहि देहि वृत्तिमेव देहलीपुराधिपे!।।६४
दुर्लभास्ति वृत्तिरत्र मे किमस्ति पातकं?
कालिकापदे मतिस्तु सर्वदा दधाम्यहम्।
भूसुरेऽपि पूज्यभावनां करोमि कालिके!
वृत्तिसिद्धिरस्तु मेऽत्र देहलीपुराधिपे!।।६५
क्रमशः.......

**इति श्री युवराजभट्टराईकृतं देहलीपुराधिपायाः**
**कालिकायाः वृत्तिप्राप्तिस्तोत्रं श्रीकालिकायै समर्पितम् अस्तु।**



डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्र

# संस्कृत- कथामञ्जरी"
# ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
## "अथ राजपुत्र-भल्लूककथा" (२)

राजपुत्रस्य तुरगो राजपुत्रेण शून्यो नगरमगमत्। जनाः अश्वं शून्यं दृष्ट्वा राज्ञोऽग्रे केवलमागतमश्वमाचख्युः। ततो राजा मन्त्रिणमाहूय भणति स्म- भो मन्त्रिन्! यदा कुमारो मृगयार्थं वनं प्रति निर्गतः, तदा महानपशकुनं आसीत्, तस्य प्रत्ययो ज्ञातः। तेनाऽऽरूढोऽश्वः शून्यः सन् वनादागतः, अतस्तन्मार्गणार्थं वनं प्रति गमिष्यामः। तेनोक्तं- देव! तथा कर्तव्यम्।
ततो राजा मन्त्रिणा, परिवारेण च सह येन मार्गेण स गतः तेनैव मार्गेण वनं गतः। वनमध्ये परिभ्रमन्तं 'स-से-मि-रा' इति वदन्तं पिशाचाविष्टं कुमारं दृष्ट्वा महाशोकसागरे निमग्नस्तमादाय स्वपुरमगमत्। मणिमन्त्रौषधज्ञान् आहूय, तैत्चकित्सतोऽपि स न स्वस्थो बभूव; तस्मिन्नवसरे राजा मन्त्रिणमवदत्- भो मन्त्रिन्! अस्मिनवसरे शारदानन्दश्चेदस्थास्यत्, तर्हि क्षणमात्रेण अमुमचिकित्सिष्यत्; स मया मारितः। पुरुषेण यत् कार्य्यं क्रियते, तद्विचार्य्यैव कर्तव्यम्, अन्यथा परमापदः सम्भवति। तस्मिन्नवसरे कोऽपि निवारको नाऽऽसीत्। मन्त्रिणोक्तं- स समयस्तथैव स्थिताः। यादृशो भवितव्यञ्च तादृशी बुद्धिरपि जाता। राज्ञेक्तं- तत् तु कर्मानुसारिणाभूत्। इदानीमस्य विषये महाप्रयत्नः कर्तव्यः। मन्त्रिणोक्तं- कथम्? राजाऽब्रवीत्, यः कोप्यस्य पुत्रस्य चिकित्सां करिष्यति, तस्य अर्धराज्यं दीयते, इति मे घोषणा प्रदातव्या।
मन्त्रिणाऽपि तथा कारयित्वा स्वभवनमागत्य शारदानन्दाग्रे सर्व्वमपि वृत्तान्तमकथयत्। तत् सर्वं श्रुत्वा शारदानन्देन भणितं- भो मन्त्रिन्! राज्ञोऽग्रे निरूपय, यत् मम काऽपि कन्या वर्त्तते, तस्या दर्शनमस्य कार्यं, सा कमप्यायं करिष्यति। तच्छ्रुत्वा राज्ञोऽग्रे मन्त्रिणा तथैव कथितम्। ततो राजा सर्वसभासहितो मन्त्रिमन्दिरम् आगत्योयविष्टः। तदा राजपुत्रोऽपि 'स-से-मि-रा' वदन्नुपविष्टः। तच्छ्रुत्वा जवनिकाऽन्तःस्थितेन शारदानन्देन पद्यान्वेतानि भणितानि- तत्पद्यं श्रुत्वा कुमारेण चतुर्णांमक्षराणां मध्ये एकमक्षरं परित्यक्तम्। पुनर्हितीयं पद्यमपठत्- तत् पद्यं श्रुत्वा कुमारेण अक्षरद्वयं परित्यक्तम्। ततः तृतीयं पद्यमपठत्- ततः कुमारः एकमेवाक्षरमपठत्। तदनन्तरं चतुर्थं पद्यं अपठत्- एवमुक्तवति शारदानन्दे राजपुत्रः स्वस्थः सावधानश्च अभवत्। ततः पितुरग्रे भल्लूकस्य वृत्तान्तमकथयत्। तच्छ्रुत्वा राजाऽब्रवीत्-
"ग्रामे वससि कौमारि। अटव्यां नैव गच्छसि।
ऋक्ष-व्याघ्र- मनुष्याणां कथं जानासि भाषितन्?"
तदा जवनिकाऽन्तःस्थितेन शारदानन्देन भणितम्-

**"देव- द्विज- प्रसादेन जिह्वाग्रे मे सरस्वती।**
**तेनाऽहमवगच्छामि भानुमत्यास्तिलं यथा।।"**

तद्वचनं श्रुत्वा राजा साश्चर्यो भूत्वा यावज्जवनिकां समाकर्षति तावत् शारदानन्दं दृष्टवान्। अथ नरपति- प्रभृतिभिः सर्वेर्नमस्कृतः शारदाननदः। तदा मन्त्रिणा पूर्ववृत्तान्तः कथितः। राजा बहुश्रुतं मन्त्रिणमुवाच- भो मन्त्रिन्! तव संसर्गेण कीर्तिः प्राप्ता, दुर्गतिश्च गता, अतः पुरुषेण सतां सङ्गो विधेयः; तेनोभयमपि प्रयोजनं भवति। मम पुत्रोऽपि त्वङ्किकौशलेन महहिपञ्जालात् रक्षितः राज्ञा ईदृशानां सतां महाकुलानां संग्रहः कर्तव्यः। इति नानाप्रकारैः प्रियवचनकदम्बकैः मन्त्रिणं सन्मान्य, वस्त्रादिना सम्भाव्य च राज्यमकरोत्। इति मन्त्री भोजराजं प्रति कथां कथयित्वा पुनरब्रवीत्- भो राजन्! यो राजा मन्त्रिवाक्यं श्रुणोति, स दीर्घायुः सुखी च भवति।